चैत्रमासः
वर्षम् – ६९
षष्ठोऽङ्कः
विक्रमाब्दः २०७६
युगाब्दः ५१२१
५ अप्रेल २०१९

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



**भारती संस्कृत-मासपत्रिका**

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | गोकुलः मृत्युमुखात् प्रत्यागच्छति | डॉ. हर्षदेवमाधवः | ५ |
| ५ | नवसंवत्सरः संवत् 2076 | रमेशचन्द्र शर्मा | ९ |
| ६ | विद्याभ्यासे गुरुकुलपद्धतिरादरणीया | डॉ. सुनीता शर्मा | १० |
| ७ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | ११ |
| ८ | गणेशस्य दार्शनिकमहत्त्वम् | डॉ. सुनील कुमार शर्मा | १२ |
| ९ | सृष्टिकारणविषयकविभिन्नमतानि | डॉ. मुकेशकुमारटेलरः | १४ |
| १० | भारतीयधर्मस्य स्वरूपम् | कैलाशचन्द बुनकर | १७ |
| ११ | संस्कृतसमाचाराः | प्रधानसम्पादकः | १८ |
| १२ | खल्वाटः पतिः | अनुवादकः - डॉ. सत्यव्रत वर्मा | १९ |
| १३ | श्रीकृष्णमन्त्रमहास्तोत्रम् | आचार्य पं. नथमलशास्त्री दाधीचः | २१ |
| १४ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २३ |
| १५ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २५ |
| १६ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २६ |
| १७ | भारतभूम्याः विभूतयः | अविनाश शर्मा | २७ |
| १८ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| १९ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**


**दूरभाषः 0141–2379014, मो. 9783105699**


**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः



**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्तकेशवआप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकौ

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

राजीव दाधीच

व्यवस्थापक

पृष्ठसंयोजनम्

श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्

rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

बुद्धो ज्ञानमबोधि बौधितरुणा राधेयराकादिने
सीताप्याविरभूत् तथासितदले मासे शुभे माधवे।
रामोऽवातरदंशतो द्विजकुले वैशाखमासे शुभे
वैशाखे जनिमागतं नरहरिं वन्दामहे सादरम्।।

## मासावतरणम्

वैशाखे खलु गर्दभाः स्वनिनदैः गायन्ति गीतान्यलम्
गर्दन्तः प्रियया सहैव मधुरं गायन्ति लुण्ठन्ति च।
धूल्यां धूसररञ्जिताः सुरुचिरं क्रीडन्ति चोष्णे वने
धन्यो माधव एष यत्र नितरां नन्दन्त्यमी रासभाः।।


कार्यालयः

बी-15, भारतीभवनम्

न्यू कॉलोनी, जयपुरम् ( राज. )

ई-मेल sanskritbharti09@gmail.com

चैत्रमासः

वर्षम् 69

वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2076

अप्रैल, 2019

अङ्कः -6

पञ्चवार्षिकशुल्कम् 500/-

आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# परस्परं भावयन्तः श्रेयः परमवाप्स्यथ

...✍ पं. प्यारेमोहनशर्मा

वार्तया यदि समाधानं भवति तर्हि कस्यापि विजय-पराजयौ वा न भवतः। पक्षद्वयमध्ये सौहार्दं प्रसरति। संप्रति भारते सौहार्दस्य समधिका अपेक्षा वर्तते।

सर्वोच्चन्यायालयो अयोध्याभूमिविवादे सम्मिलित-पक्षयोर्मध्ये सर्वमान्यादेशं प्रदातुं स्वकार्यं स्थगितं व्यधात्। सम्प्रति नेदं सुनिश्चितं यत् केवलं वार्ताभिः कार्यं संसाधितं जायते अथवा वर्तमाननियमैः भूमेः स्वामित्वं निश्चिनोति। सर्वोच्चन्यायालयो विगतमासेऽकथयत् विवादे वार्तया समाधनस्यैकप्रतिशतमप्याशा वर्तते चेत् तदा पूर्वं तद्विषय एव चिन्तनीयम्। समुदायद्वयोर्मध्ये सम्बन्धदुरभिसन्धिरित्यन्वेषणापेक्षया तस्य समाधानं चिन्तनीयम्। प्रधानन्यायाधीशाध्यक्षतायां पञ्चसदस्यीयं पीठमस्मिन् विषये दीवानीप्रक्रियाया धाराया ८९ अन्तर्गतं समुपलब्धसन्धिवार्ताया विकल्पमन्वेषयति। नियमो न्यायालयायाधिकारं प्रयच्छति यत् स कस्यापि विवादस्य सौहार्दपूर्णं समाधानमन्वेष्टुं तं मध्यस्थतायै संप्रेषयेत्।

सन्धिवार्तायाम् एकः सदस्यो रविन्दबोबडेमहोदयः। षोडशशताब्द्यां बाबरी मस्जिद मन्दिर निर्मितिविवादे-तिवृत्तविषयं यत् किमपि जातं तत्रेदं पीठं न किमपि कर्तुं शक्नोति केवलं वर्तमानं परिवर्तितुं शक्नोति। यश्च विवादोऽस्माकं सम्मुखे वर्तते तत्र निर्णयं दातुं शक्नोति।

न्यायाधीशोऽवदत् द्वौ पक्षौ यदा सन्धिं विधातुं समुपविशेतां तदा तयोर्मध्ये प्रचलिता वार्ता गोपनीया भवेत्। वयं जानीमो यत् सम्यक् सौहार्दपूर्णा प्रचलन्ती वार्ता यदा बहिरागच्छति तदा तत्र तर्क-वितर्क-कुतर्काः समाविष्टा जायन्ते। सन्दर्भविहीनास्तथ्याः जनमान-समुद्वेलयन्ति। तदा लघुभ्रातरः स्वकीयां रोटिकां पचन्ति। तेन वातावरणं दूषितं भवति समाचारपत्रेषु सद्यः अन्तः पक्षयोः या वार्ता प्रचलति तद्विषये प्रकाशनं न भवितव्यम्। तस्या वार्तायाः प्रकाशनं निश्चितसमयानन्तर- मेव भवेत्।

खण्डपीठस्येकोऽन्यः सदस्यो धनंजय वाई चन्द्र-चूडोऽकथयत् यदस्मिन् विषये द्वयोः पक्षयोर्मध्ये सन्धिः सुलभो विद्यते। ते अकथयन् यन्नायं विषयो द्वयोः पक्षयोः अपितु समुदायानां विषयो वर्तते। यदि मध्यस्थतां वयमङ्गीकुर्मस्तदापि सर्वमान्यं समाधानं कथं भविष्यति। तत्कालमेव हिन्दूमहासभाया वाक्कीलोऽवदत् यत् नहि वयं मध्यस्थतां स्वीकुर्मः। एष अस्माकं भावनात्मको विषयो विद्यते। यद्यपि न्यायाधीशो बोबडे वाक्कीलमवद् यत् भवतां पूर्वानुमानविधानं न समुचितम्। न्यायालयः सन्धिवार्तया विवादस्य समाधानं विधातुमकथयत् स एव समुचित उपायः। आस्थायाः विवादे समाधानस्य वार्ता एव सर्वाधिकः श्रेष्ठो विकल्पो विद्यते। परस्परं वार्तया निःसरति विकल्पे न कस्यापि विजयः न च कस्यापि पराजयो वा। परस्परं सौहार्दं तिष्ठति वर्धते च।

नैकानि उदाहरणानि विद्यन्ते यत्र पक्षविपक्षाः वार्ताभिः समाधानं नाकुर्वन् तत्र विनाश एवाभवत्। पुरा महाभारतस्य कौरवपाण्डवयोर्युद्धस्य प्रत्यक्षमुदाहरणं विद्यते तदा दुर्योधनः श्रीकृष्णेन प्रस्तुतं सन्धिप्रस्तावं नाङ्गीचकार किमन्यत् पञ्चग्रामान् अपि न दातुमैच्छत् अकथयच्च सूच्यग्रं नैव दास्यामि विना युद्धेन केशव! तदा सर्वनाश एव संजातः। अतः अयोध्यायां राममन्दिर-निर्माणविषये उभावेव सम्प्रदायौ सौहार्दपूर्णं समाधानं स्वीकुरुताम्। न्यायालयस्य निर्णयं सर्वे स्वीकुर्युः। अन्यथा सद्य एव संजातः सर्जीकलस्ट्राइकः अत्रापि भवितुं शक्नोति।

लघुकथा

# गोकुलः मृत्युमुखात् प्रत्यागच्छति

❑ डॉ. हर्षदेवमाधवः

गुजरातराज्ये रामपुरं नाम एकः ग्रामः अस्ति। तत्र गोकुलः नाम कृषकः निवसति स्म। गोकुलः विंशतिवर्षीयः आसीत्। स तस्य मात्रा सार्धं निवसति स्म। गोकुलः यदा पञ्चवर्षीयः आसीत् तदा तस्य पिता दिवं गतः। अतः माता गोकुलेन सह स्वक्षेत्रे कृषिकर्म करोति स्म। यदा प्रभृति गोकुलः षोडशवर्षीयः अभवत् तदा प्रभृति सः सर्वम् अपि कृषिकार्यं स्वयम् एव करोति स्म। गोकुलस्य गृहे द्वौ बलीवर्दौ, एका धेनुः च – इत्थं त्रयः पशवः आसन्। तस्य समीपे शकटम् अपि आसीत्। प्रातःकाले शकटेन सः क्षेत्रं गच्छति स्म, सायंकाले बलीवर्दाभ्यां कृते तृणभारम्, क्षेत्रे उत्पन्नानां शाकानां स्यूतान् शकटे निधाय सः प्रतिनिवर्तते स्म। गोकुलः उदारः आसीत्। सः प्रतिदिनं गोभ्यः तृणान्नं ददाति स्म। क्षेत्रे एकस्मिन् कक्षे सः धान्यकणान् विकिरति स्म। अतः सर्वे पक्षिणः तत्र दिनपर्यन्तम् आगच्छन्ति स्म। रात्रौ क्षेत्रं रक्षितुं सः गृहे भोजनं कृत्वा मञ्चे अस्वपत्।

एकदा एकः ब्राह्मणः काशीयात्रां कर्तुं निर्गतः आसीत्। सः गोकुलस्य क्षेत्रस्य पार्श्वे मार्गेण गच्छति स्म। ब्राह्मणः अत्यन्ततृषातुरः अभवत्। सः गोकुलं जलम् अयाचत। गोकुलः कूपात् जलम् आनयत्। ब्राह्मणः अब्रवीत्, 'भ्रातः ! अहं स्नातुम् इच्छामि।' गोकुलः अवदत्, 'महाशय! त्वं स्नानं कुरु, भोजनं च कुरु।' गोकुलः कूपात् उदञ्चने जलम् आनयत्। सः स्वभोजनं ब्राह्मणाय अददात्। ब्राह्मणः अपृच्छत्, 'वत्स! तव भोजनम् अहम् अखादम्। अधुना त्वं किं करिष्यसि?' गोकुलः सहासं प्रत्युदरत्, 'हे महाशय! भोजनं मम नास्ति। सर्वम् अपि मम रामस्य वर्तते। इदं भोजनं तव भाग्ये लिखितम् अस्ति। अतः त्वं स्वीकुरु। अहं तु वृक्षाणां फलैः उदरस्य पूर्तिं करिष्यामि। सायंकाले तु मम माता भोजनं दास्यति एव।'

ब्राह्मणः भोजनं कृत्वा सन्तुष्टः अभवत्। सः गोकुलम् अवदत्, 'स्वस्ति ते भवतु।' सहसा सः गोकुलस्य मुखम् अपश्यत्। सः गोकुलम् अवदत् 'वत्स, विवाहं शीघ्रं मा कुरु।' गोकुलः अवदत्, 'महाशय! मम माता विधवा अस्ति। मम समीपे धनं नास्ति। अतः मम विवाहः कथं भविष्यति?'

ब्राह्मणः अवदत्, 'विवाहार्थं व्यवस्था भविष्यति, किन्तु विवाहं न कुर्यास्तदेव वरम् अस्ति।' ब्राह्मणः भोजनं कृत्वा काशीं प्रति अगच्छत्। सायंकाले गोकुलः मातरं सर्ववृत्तान्तम् अकथयत्। माता निश्वस्य न किञ्चित् अपि अवदत्। गोकुलः ब्राह्मणस्य कथनस्य अर्थं न अजानात्। सः क्षेत्रात् बहिः एकां प्रपाम् अरचयत्। प्रतिदिनं सः द्वे जलपात्रे जलेन अपूरयत्। यात्रिणः जलम् अपिबन्। केचित् श्रमिकाः अपि जलं पातुम् आगच्छन्। एकदा ग्रामे एकः अपरिचितः कुक्कुरः आगतः। सर्वे ग्रामस्य कुक्कुराः तेन सह कलहम् अकुर्वन्। ते सर्वे तं कुक्कुरं दंष्ट्राभिः क्षतैः विक्षतम् अकुर्वन्। गोकुलः यष्ट्या सर्वान् कुक्कुरान् दूरम् अकरोत्। सः कुक्कुरेभ्यः तम् अपरिचितं कुक्कुरम् अत्रायत। अधुना असौ कुक्कुरः तस्य क्षेत्रे वस्तुम् आगच्छत्। गोकुलः तम् अपि मित्रवत् पालयति स्म। गोकुलस्य क्षेत्रे द्वित्राः चौराः प्रविष्टाः। गोकुलः निद्रावस्थायाम् आसीत्। किन्तु कुक्कुरः चौराणां पादेषु दंष्ट्राभिः प्रहारम् अकरोत्। चौराः चलितुं पलायितुं वा शक्ताः न अभवन्। रक्षकाः तान् चौरान् कारागृहे न्यक्षिपन्। गोकुलः कुक्कुराय 'वीरः' इति नाम अददात्। वीरः सदैव गोकुलम् अरक्षत्।

एकदा गोकुलस्य माता तं विवाहं शीघ्रं कर्तुम् आदिशत्। किन्तु गोकुलः प्रत्युत्तरं न अददात्। सा पुनः पुनः तं कन्यां वरयितुम् अकथयत्।

गोकुलः उदासीनः अभवत्। सः क्षेत्रे गत्वा शीतस्य प्रभावं दूरीकर्तुम् अग्निं प्रज्वाल्य रात्रिं निद्रां विना अक्षपयत्। प्रातःकाले सः धान्यकणान् विहगेभ्यः व्यकिरत्। विहगाः धान्यकणान् खादित्वा गताः। तदा तत्र भुवि गोकुलः एकः महर्घं सुवर्णहारम् अपश्यत्। कोऽपि विहगः सुवर्णहारं चञ्च्वा आनयत्। गोकुलः हारं ग्रामे सर्वजनान् अपृच्छत्, किन्तु तस्य हारस्य स्वामी न कोऽपि अभवत्। अतः गोकुलः तं हारं मात्रे अददात्। माता तं हारं विक्रीय प्रभूतं धनं प्राप्तवती। इदानीं सा गोकुलाय कन्याम् अन्वेष्टुं जातिजनान् अकथयत्। प्रतिसप्ताहं कन्यासम्बन्धिनः आगच्छन्ति स्म। गोकुलः विविधैः व्याजैः निषेधम् अकरोत्।

एकदा गोकुलस्य माता गोकुलम् अवदत्, 'पुत्रक ! अहं पश्यामि यत् सुरूपां कुलीनां कन्याम् अपि त्वं न इच्छसि। केनापि कारणेन त्वं विवाहं कर्तुं निषेधं करोषि। किन्तु अहं आगामिनि सोमवारे अन्नत्यागं करिष्यामि। त्वं सुलक्षणां कन्यां स्वीकुरु अथवा त्वं मातरं विना जीव।'

गोकुलः इदानीं विवाहं कर्तुं विवशः अभवत्। किन्तु सः वारं वारं ब्राह्मणस्य वाक्यं स्मरति स्म। अन्ततः मातुः आज्ञां मत्वा एकस्याः कन्यायाः कृते स्वीकृतिं अददात्। तस्याः नाम राधा आसीत्। राधायाः पितरौ शीघ्रं विवाहं कारयितुं निवेदनम् अकुरुताम्।

कतिपयाः दिवसाः व्यतीताः। एकदा गोकुलः क्षेत्रे कार्यं करोति स्म। तदा सः ब्राह्मणः काशीयात्रां कृत्वा प्रत्यागच्छत्। सः पुनः गोकुलस्य क्षेत्रे स्नानम् अकरोत्। गोकुलः तस्मै स्वभोजनम् अददात्। भोजनं कृत्वा ब्राह्मणः अब्रवीत्, 'पुत्रक, अहं निषेधम् अकरवम्। तथापि त्वं विवाहं कर्तुं विवशः अभवः। किन्तु शृणु, विवाहस्य प्रथमरात्रौ तव गृहे तव मृत्युः भविष्यति। त्वं सावधानः भव। मृत्योः स्वात्मानं त्रातुं प्रयत्नं कुरु।'

गोकुलः अवदत्, 'भगवन्, अहम् अनुगृहीतः अस्मि। यत् भाग्ये लिखितं भवति तत् भवति। कन्यायाः स्वीकारेण मम माता प्रसन्ना अभवत्। सा मम विवाहं द्रक्ष्यति इति मम आनन्दः।' सः ब्राह्मणम् अनमत्। ब्राह्मणः अवदत्, 'भगवान् तव कल्याणं करोतु। अहं तव कल्याणाय प्रार्थनां करिष्यामि।' ब्राह्मणः स्वग्रामं प्रति प्रस्थितः। गोकुलः सायंकाले मातुः समीपे वार्तालापं करोति स्म। तदा सः कुटीरात् बहिः कोलाहलम् अशृणोत्। गोकुलः शीघ्रम् अधावत्। बहिः द्वित्राः प्रतिवेशिनः यष्टिभिः सहस्थिताः आसन्। गोकुलः अपृच्छत्, 'श्यामपितृव्य ! किं कुरुथ यूयम्? केनापि सह कलहः जातः वा?' श्यामपितृव्यः अवदत्, 'न हि नहि, मम गृहस्य समीपे एकः महाकायः सर्पः निर्गतः अस्ति। वयं तं हन्तुम् इच्छामः। अन्यथा असौ कस्य अपि प्राणान् हरिष्यति। अयं सर्पः तु भीषणः दृश्यते।'

गोकुलः अहसत्, 'अये, पितृव्य! कस्मात् सर्पात् बिभेषि? असौ स्वमार्गं गमिष्यति एव।'

गोकुलः एकं पुराणं घटम् आनयत्। सः घटं दर्शयित्वा सर्पम् अवदत्, 'हे महाशय! ग्रामे तव निवासः नास्ति। अत्र त्वं मनुष्येभ्यः बिभ्यसि, मनुष्याः त्वत्तः बिभ्यति। अतः अस्मिन् घटे कतिपयक्षणान् निवस। अहं त्वां मम क्षेत्रे विसर्जयिष्यामि।

अतः पश्चात् त्वं यत्र गन्तुम् इच्छसि, तत्र यथासुखं गच्छ। हे वन्यजीव! मम विश्वासं कुरु।' एतत् श्रुत्वा सर्पः स्वयम् एव घटं प्राविशत्। गोकुलः तं घटं पिहितं कृत्वा स्वक्षेत्रम् अनयत्। शनैः शनैः सः पिधानम् दूरम् अकरोत्। सर्पः बहिः निरगच्छत्। शनैः शनैः स्वफणाम् उन्नतां कृत्वा सर्पः मनुष्यवाचा अवदत्, 'धन्यः असि गोकुल! त्वं मम प्राणान् रक्षितवान्।' गोकुलः अवदत्, 'न हि न

हि, भ्रातः! त्वयि अपि मम कृष्णपरमात्मा अस्ति। त्वं साधय। शुभाः ते पन्थानः सन्तु। न हि, कश्चित् कालं विश्रम्य गच्छ। अहं तव पानार्थं दुग्धम् आनयामि।' गोकुलः गत्वा दुग्धम् आनयत्। सर्पः दुग्धम् अपिबत्। गोकुलः हस्तं प्रसार्य अवदत्, 'भ्रातः! साधय। इदानीं तव यात्रा शुभा भवतु।'

सर्पः तत् श्रुत्वा अवदत्, 'मम यात्रा कदापि शुभा न भवति। अहम् एव अशुभः। अहं पापं कर्तुम् निर्गतः।'

गोकुलः अवदत्, 'कोऽपि जीवः न पापं करोति, न पुण्यं करोति। यथा परमात्मा आदिशति तथा करोति। त्वाम् अपि परमात्मा यथा आदिशति तथा करिष्यसि तदा पापं न भविष्यति।'

सर्पः निश्वस्य अवदत्, 'अहं परमात्मा यथा आदिशति तथैव करोमि। तथापि पापं भवति एव। अहं निर्दोषान् हन्मि। तत् कार्यम् अहं मम प्रभोः आज्ञया करोमि।'

गोकुलः अवदत्, 'अहं तव कथनस्य यथार्थं न ज्ञातुं शक्नोमि। ईश्वरः पापं कर्तुं कमपि आज्ञापयति तत् अहं न मन्ये।' सर्पः अवदत्, 'शृणु भ्रातः अहं यमदूतः। अहं विविधानि रूपाणि धृत्वा यमराजस्य आज्ञया भ्रमामि। अद्य तव ग्रामस्य एकां वृद्धां हन्तुम् अहम् आगतः। अहं तव गृहम् अपि दृष्टवान्। अहम् एव त्वां नेतुम् आगमिष्यामि। त्वं सरलः दयालुः भक्तः, अतः अहं तुभ्यं मम परिचयं ददामि। तव दुग्धं पीत्वा अहं त्वां हनिष्यामि इति मम दुःखम् अस्ति। किन्तु यमराजस्य आज्ञया अहं सर्वं करोमि। अहं सर्वजीवेषु महान् पापिष्ठः जीवः, यतः हि अहं नित्यं सर्वेभ्यः पीडान् दास्यामि।'

गोकुलः उच्चैः अहसत्। सः अकथयत्, 'भ्रातः ! इयं नास्ति तव पापम्। त्वं तु स्वामिनः कर्तव्यं करोषि। त्वं मां हनिष्यति इति ज्ञात्वा प्रसन्नः अस्मि। अहं यं रक्षितवान् स एव मां हनिष्यति इति मया ज्ञातम्। यद् भावि तत् भविष्यति एव। त्वं चिन्तां मा कुरु। पुनरपि यदा कदापि दुग्धं पातुम् इच्छा भवेत्, तदा आगच्छ। ईश्वरः तव कल्याणं करोतु।' सर्पः फणां भुवि निधाय मस्तकं नमयित्वा प्रणामम् अकरोत्।

गोकुलः इमां कथां न कमपि अकथयत्। माता दुःखिता भविष्यति इति विचार्य सः मातरं प्रति अधिकं स्नेहं प्रादर्शयत् अपि च विवाहार्थम् अधिकम् उत्साहम् अदर्शयत् किन्तु मनसि सः स्वल्पायुः जानाति स्म। मित्रैः सह सः विवाहयोग्यानि वस्त्राणि अक्रीणीत्। गृहे सुधालेपम् अकरोत्। शनैः शनैः विवाहतिथिः समीपे आगच्छत्। मित्राणि वारं वारं पृच्छन्ति स्म, किन्तु सः स्वस्य औदासीन्यस्य कारणं न कमपि अकथयत्। अन्ततः विवाहदिवसः समीपे आगच्छत्। गोकुलः समीपस्थं तीर्थयात्रास्थलम् अगच्छत्। सः देवदेवं महादेवम् अप्रार्थयत्, 'हे महादेव! मम सर्वान् अपराधान् क्षमस्व। मम विधवा वृद्धा माता प्रसन्ना भवेत् तथा कुरु। मम पत्नी प्रथमरात्र्याम् एव विधवा भविष्यति। सा कथं जीविष्यति? हे प्रभो! त्वम् एव कर्ता, भर्ता संहर्ता च। कृपां कुरु।' इति।

विवाहोत्सवस्य मुहूर्तम् आगच्छत्। गोकुलः नववस्त्राणि धृत्वा सज्जः अभवत्। गोकुलस्य मात्रा सह सर्वाः स्त्रियः विवाहगीतानि अगायन्। गोकुलस्य मित्राणि वरस्य अश्वं पुरतः नृत्यं प्रारभन्त। गोकुलः अपि अश्वात् नीचैः अवरुह्य मित्रैः सह रासम् अकरोत्। सः अपि बहु बहु अनृत्यत्। सर्वे अवदन्, 'गोकुलः त्वं तु वरः। त्वं श्रान्तः भविष्यसि।' किन्तु सः अवदत्, 'न जाने, अहं पुनः नर्तिष्यामि वा न वा। अद्य मम चरमस्य आनन्दः उत्सवः। श्वः किं भविष्यति इति कः जानाति?'

जन्यायां ये वृद्धाः आसन् ते अवदन्, 'गोकुल, शुभं वद। श्वः अपि मङ्गलम् एव भविष्यति। अधुना मात्रे अधिकं सुखं दातुं प्रयत्नं कुरु।'

गोकुलः निःश्वस्य निरुत्तरः अभवत्। विवाहविधिः सुचारुरूपेण सम्पन्नः अभवत्। गोकुलः मार्गे राधायाः कर्णे सर्वं वृत्तान्तम् अवदत्। राधा अवदत्, 'विवाहस्य उत्सवे अपि मम दक्षिणनेत्रे दक्षिणबाहौ च स्फुरणम् अनुभवामि। यतः किञ्चित् अशुभं भविष्यति। किन्तु चिन्तां मा कुरु। गौरी देवी अवश्यं मम सौभाग्यं रक्षिष्यति इति मम श्रद्धा वर्तते। त्वम् अपि शिवस्मरणं कुरु।' रात्रौ जन्याः प्रत्यागमनं ज्ञातम्। गृहद्वारस्य समीपे स्थितः वीरः कुक्कुरः उच्चैः उच्चैः भषति स्म। कुक्कुरः गोकुलस्य समीपे आगत्य किञ्चित् अवदत्। गोकुलः वीरस्य भाषाम् अजानात्। गोकुलः अवागच्छत् यत् 'मृत्युदूतः रथ्यायां प्रविष्टः' इति।

गोकुलः मित्रैः सह रात्र्यां गोष्ठीम् अकरोत्। सः साग्रहं नानाविधाः कथाः अकरोत्। राधा शयनकक्षे तं प्रत्यपालयत्। रात्र्या एकादशवादनम् जातम्। गोकुलस्य मित्राणि शनैः शनैः विविधव्याजैः स्वगृहं प्रति प्रस्थानम् अकुर्वन्। गोकुलः अन्तः प्राविशत्। सः शयनकक्षस्य देहल्यां समीपस्थदीपस्थानस्य लघुके कक्षे कुण्डलाकारं सर्पम् अपश्यत्। सः शिवस्मरणं कृत्वा अन्तः प्रवेष्टुम् अचलत्। तदैव पञ्चषाः संन्यासिनः तस्य कुटीरस्य द्वारे आगच्छन्।

गोकुलः तान् दृष्ट्वा तत्रैव स्थित्वा तेषां सत्कारम् अकरोत्। सः राधां बहिः आगन्तुम् उच्चैः अवदत्। राधा शीघ्रम् आगत्य संन्यासिभ्यः जलम् अददात्। गोकुलः सानन्दम् अवदत्, 'हे महाभागाः! धन्यः अहम् अस्मि। युष्माकं स्वागतं करोमि। यूयं खट्वायाम् उपविशत। मम भोजनं स्वीकुरुत।'

संन्यासिनः अवदन्, 'वयं परिव्राजकाः, सदैव अटामः। यत् वयं प्राप्नुमः तत् खादामः। अतः गृहे यत् किमपि अस्ति तत् देहि।'

राधा महानसं गत्वा दुग्धपात्रस्य दुग्धं चुल्यां उत्काल्य शर्करायुक्तं कृत्वा आनीतवती। सा सर्वान् संन्यासिनः पादयोः निपत्य निवेदनम् अकुर्वन्, 'हे सन्तः! यूयं दुग्धं पीत्वा मुहूर्तार्धं कीर्तनं कुरुत। अहं दालेन सह रोटिकां पचामि। अतिथिदेवतानां स्वागतं कृत्वा वयं धन्याः जाताः।' गुर्जरराज्ये नववधूः मातृगृहात् घटे मिष्टान्नं निवेश्य श्वश्रूगृहम् आनयतीति परम्परा वर्तते। असौ घटः मातृघटः 'मा माटलु' इति गुर्जरे कथ्यते। सहसा राधिका मिष्टान्नपूर्णं घटम् अस्मरत्। सा विना विचारं शीघ्रं वस्त्रपिहितं घटम् आनयत्। सा संन्यासिनः अवदत्, 'हे अतिथिदेवताः! अद्य आवयोः विवाहस्य प्रथमा रात्रिः अस्ति। अतः मिष्टान्नं स्वीकृत्य आवां कृतार्थौ कुरुत।'

संन्यासिनः उष्णमिष्टं दुग्धं पीत्वा, मिष्टान्न-खण्डान् खादित्वा सन्तुष्टाः अभवन्। ते हरिसंकीर्तनं कृतवन्तः। तदैव राधा सर्वेभ्यः दालेन सह रोटिकाः अददात्। क्षेत्रात् कानिचित् आनीतानि फलानि आसन्। एतत् सर्वं खादित्वा सर्वे संन्यासिनः प्रसन्नाः सन्तुष्टाः अभवन्। संन्यासिनः अवदन्, 'अधुना वयं गन्तुम् इच्छामः।' तदा राधा च गोकुलः च तेषां पादेषु अनमताम्।

संन्यासिनः अवदन्, 'वत्सौ, युवयोः दाम्पत्यजीवनं चिरंजीवि भवतु। पुत्रि! त्वम् अखण्डसौभाग्यवती भव। तव सौभाग्यं चिरं जीवतात्। युवयोः मङ्गलं भूयात्।'

गोकुलः प्रणम्य सनिःश्वासं अतिष्ठत्। सः कानिचित् कार्षापणानि तेषां पादेषु निधाय स्वीकर्तुम् अवदत्। तदा संन्यासिनः अवदन्, 'वत्स! तव द्रव्यस्य आवश्यकता नास्ति। किन्तु तव औदार्यं वीक्ष्य वरं दास्यामः यत् लक्ष्मीः तव गृहे चिरं वत्स्यति। तव संततिः अपि सुखं प्राप्स्यति।' संन्यासिनः अगच्छन्। राधा गोकुलेन सह शयनकक्षं प्रति प्रस्थिता, तदैव देहलीस्थे दीपगवाक्षे स्थितः सर्पः अवदत्, 'भ्रातः गोकुल! क्षमां कुरु। अहं मम कर्तव्यपालनं कर्तुम् आगतः।'

गोकुलः अवदत्, 'भ्रातः ! अद्य मम विवाहस्य उत्सवः अस्ति। त्वमपि मम दुग्धपात्रस्थम् अवशिष्टं दुग्धं पिब। ततः पश्चात् तव कर्तव्यं कुरु।' सर्पः दुग्धम् अपिबत्। ततः पश्चात् सः वारं वारं गोकुलम् अदशत्। किन्तु गोपालस्य शरीरे विषस्य प्रभावः न अभवत्। न वा सः पीडाम् अन्वभवत्। चकितः भूत्वा यमदूतः गोकुलम् प्रणम्य अगच्छत्।

यमदूतः धर्मराजं प्रणम्य सर्वम् अपि वृत्तान्तं न्यवेदयत्, 'प्रभो ! अहं वारं वारम् अदशम् किन्तु गोकुलः जीवितः अस्ति। किम् अस्य कारणं भवेत्? अहं प्रथमवारं जीवनम् अगृहीत्वा आगतः। क्षम्यताम्'

धर्मराजः अवदत्, 'गोकुलस्य मृत्युकालः आसीत् स एव। किन्तु विस्तरशः शृणु।'

गोकुलः प्रपाम् अरचयत्, अतः तस्य पुण्यस्य वशात् ब्राह्मणः आगच्छत्। ब्राह्मणः भोजनम् अकरोत्। अतः सः गोकुलं मृत्युविषये रहस्यम् अवदत्। गोकुलः विहगेभ्यः अन्नकणान् अददात्। अतः तेन पुण्येन सः लक्ष्मीवान् अभवत्। गोकुलः कुक्कुराय रक्षणम् अददात्। अतः तेन तव आगमनस्य सूचना प्रदत्ता। गोकुलः तस्य मृत्युमुहूर्ते संन्यासिनाम् आतिथ्यम् अकरोत्। अतः तस्य मृत्युवेला अतिक्रान्ता। संन्यासिनः भगवतः सङ्कीर्तनम् अकुर्वन्। अतः तस्मिन् क्षणे गृहात् मृत्युच्छाया विलीना अभवत्। गोकुलस्य पत्नी मातृगृहात् आनीतं मिष्टान्नम् अतिथिभ्यः अददात्। सा रात्रौ श्रान्ता अपि भोजनम् अपचत्। अतः बुभुक्षितानां संन्यासिनां वरप्रदानेन राधा अखण्ड-सौभाग्यवती अभवत्। अधुना आशतं वर्षेभ्यः पूर्वं गोकुलस्य मृत्युकालः न आगमिष्यति।

वत्स! स्मर, त्वं धर्मरहस्यम्। तृषार्तेभ्यः जलम्, बुभुक्षितेभ्यः अन्नम्, पित्रोः शुश्रूषा, अतिथीनां स्वागतं, जीवस्य औदार्यम् एतत् सर्वं महते पुण्याय कल्पते। मनुष्यः सुकृतैः मृत्योः मुखात् अपि स्वात्मानं रक्षितुं क्षमः- इति धर्मस्य रहस्यम् अस्ति। त्वं न कमपि प्रमादं कृतवान्। किन्तु भगवतः प्रसादेन सर्वमपि भवति- न भवति अन्यथा वा भवति। गच्छ, तव कर्तव्यं कुरु। प्रथमवारं यमदूतः पृथ्व्याः विनापि जीवात्मानं प्रत्यागच्छत्।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अहमदाबाद-380058**

# नवसंवत्सरः संवत् 2076

❑ **रमेशचन्द्र शर्मा**

**वर्षे नवेऽस्मिन् नवजातहर्षाः।**
**भवन्ति पूजाः कुलदेवतायाः।।**
**नवा नवीना च विचारमाला।**
**समर्चनं गौरिगणेशपूजा।।**

**नवीनवर्षे नवशासनं स्यात्।**
**दृढाः सशक्ता ननु द्वारपालाः।।**
**देशो मदीयो धनधान्ययुक्तः।**
**भवप्रसादात् हि भविष्यतीति।।**

**उदीरिता सत्यसुधा-समृद्धा।**
**शक्तिर्हि नारी नवयोजनानाम्।।**
**प्रचण्डरूपाणि च चण्डिकायाः।**
**नवीनवर्षे खलु सम्भवन्ति।।**

**जनाश्च सर्वे सुखिनो भवन्तु।**
**क्षेत्रेऽथ देशे धनधान्ययुक्ते।।**
**देशस्य रक्षा नवद्वारपालैः।**
**सदा भवेदेव सुचारुरूपम्।।**

**सेवानिवृत्त व्याख्याता संस्कृत**
**106, ग्रीन पार्क, दादी का फाटक, जयपुर**

# विद्याभ्यासे गुरुकुलपद्धतिरादरणीया

❑ डॉ. सुनीता शर्मा

'विद्या ददाति विनयम्' इति प्राज्ञाः वदन्ति। तैरनुभूतोऽयमर्थः। इदानीन्तु न तथाऽनुभूयते। अत्र को वा हेतुः? विद्यार्थिनां विद्याभ्यासक्रमः अधुनातनः, विनयदाने न प्रभवति इति विमर्शकैरवश्यमभ्युपगन्तव्यं भवति। प्राचीन-गुरुकुल-पद्धतौ विद्यार्थिनां विनयाधानं सर्वत्र सुलभमासीत्, इति जायते।

**गुरूणां सन्निधौ तिष्ठेत् सदैव विनयान्वितः।**
**पादप्रसारणादीनि तत्र नैव समाचरेत्।।**

अत्र पादप्रसारणादीन्यपि अविनयलक्षणानि इति प्रतिपादयता शास्त्रेण गुरु-देवता-सन्निधौ क्रियमाणः स्वल्पोऽपि अपराधः महान्तं दोषं जनयति। अतः सूक्ष्मेक्षिकया वर्तितव्यम् इति सूच्यते।

**गुकारस्त्वन्धकारः स्याद् रुकारस्तेज उच्यते।**
**अज्ञानग्रासकं ब्रह्म गुरुरेव न संशयः।।**

(स्कंदपुराण/गुरुगीता 1/33)

गुरुशब्दार्थ कः? सर्वथाऽपि स्वयमधीत्य शिष्यानध्यापयति यो महानुभावः स एव गुरुरित्युक्तं भवति। ''गुकारस्त्वधंकारे स्यात् रुकारस्तन्निवारकः'' इत्युक्त्या अन्तःकरणस्थितं अज्ञानांधकारं ज्ञान-ज्योतिष्प्रदानेन यो निवारयति स गुरुरित्यन्ये। यः तत्त्वज्ञानं संपाद्य सततं शिष्याणां हिताय उद्यतो भवति, स. गुरुः इत्यपरे।

गुरु-शिष्ययोः सम्बन्धः अन्यादृशः लोकोप-कारकश्च। 'प्रवर्तितो दीप इव प्रदीपात्'।। इतिवत् शिष्यः अध्ययनानन्तरं गुरुपदवीमारोढुं योग्यो भवति। एकेन दीपेन प्रवर्तिता अनेके दीपा यथा प्रकाशं प्रददति तद्वत् एकेन ग्रामस्थानां नगरस्थानां च बहूनां जनानां सुखेन विद्याभ्यासं कर्तुं सदवसरः प्रदत्तो भवेत्।

पाठप्रवचनयोर्विषये श्रुतिरपि विचारपुरस्सरं स्वादरं प्रकाशयति। वेदार्थज्ञानं विना वेदार्थानुष्ठानं न सम्भवति। वेदार्थानुष्ठानं विना श्रेयो न घटते। अतः श्रेयःकांक्षी सर्वोऽपि लोकः वेदार्थज्ञानाय वेद-वेदार्थ-प्रकाशपरं गुरुं गवेषते। उक्त-तपोऽनुष्ठानं परगुरुं संप्राप्य, तस्मात् श्रेयोमार्गमधिगत्य स्वात्म-संतुष्टिं समश्नुते।

गुरुगतां विद्यां शिष्यः कथमधिगच्छेत्? शुश्रूषया अधिगच्छेत्। शुश्रूषा नाम का? श्रोतुमिच्छा। गुरूपदेशं यः श्रद्धया शृणोति, स एव गुरुगताया विद्याया-स्समीचीनं भाजनं भवति। अस्मिन् विषये दृष्टान्तो वर्तते। भूमौ जलं वर्तते। भूमिगतं जलं कथमधिगच्छति लोकः? खननेनाधिगच्छति। खननं विना भूमिगतमपि तोयं यथा अधिगन्तुं न शक्यते तद्वत् शुश्रूषां विना गुरुगतामपि विद्याम् अधिगन्तुं न शक्यते। अतः विद्यार्थिनां विद्याधिगमने गुरूपदेशश्रवणेच्छा बहुमुख्यतयावसीयते। कथितश्चापि-

**स पण्डितः स च ज्ञानी**
**स क्षेमी स च पुण्यवान्।**
**गुरोर्वचस्करो यो हि क्षेमं तस्य पदे-पदे।**

(ब्रह्मवैवर्त्तपुराण 1/23/7)

सूक्ष्मवस्तुग्रहणेऽपि साधनतया निर्दिष्टानि श्रवण-मनन-ध्यानानि। तेषां मध्ये मुख्यतमं श्रवणरूपं साधनमेव विद्यार्थिभिः दूरतो निरस्तम्। मननादिकं तु बहुदूरतः पलायते। किं च विद्यार्थिनां राजकीयव्यवहारे प्रवेशोऽपि विद्याभ्यासं प्रतिबध्नाति। विद्यार्थिनां बुद्धेरेकाग्रता अपेक्ष्यते। विद्यार्थिभिः काम-क्रोध-लोभ-मोह-मद-मात्सर्याख्या अन्तः शत्रवो विजेतव्याः। विद्यार्थिनां चित्तं सर्वदा सुप्रसन्नं भवेत्। मनोदोषाणां औषधमपि निर्दिष्टम्। ''धी-धैर्यात्मादि-विज्ञानं मनोदोषौषधं परम्'' इति अष्टांगहृदये। मनोदोषौषधत्वेन परिगृहीतः आत्मानात्म-विवेकः प्रथमतः संपादनीयः। आत्मज्ञानं विना पुरुषः

आत्मबलं न प्राप्नोति। अतः आत्म-ज्ञानमावश्यकम्, आत्मज्ञानप्राप्तये गीताशास्त्रमेक-मेव अलम् यत्र भगवता साक्षादर्जुनं निमित्तीकृत्य सर्वेषामुद्धारायैव उपदिष्टं वर्तते। गुरुमुखतः एवं गीता ज्ञानं प्राप्तवानर्जुनः।

अस्माभिरपि गुरुमुखतः एव गीता-ज्ञानं प्राप्तव्यम्। चित्तप्रसादने गीताज्ञान-समानं गंगाजलं नोपलभ्यते। जनकादयः गीताज्ञानबलेनैव लोकपालक-कीर्ति-शालिनो बभूवुः। महात्मा-गान्धिमहोदयोऽपि गीताज्ञानबलेनैव स्वातन्त्र्य-संग्रामे विजयमवाप।

सर्वत्र ये ये महानुभावा महत्कार्यं साधयन्ति, ते सर्वेऽपि गीताज्ञान-संस्कृत-मतयो विराजन्ते। गीताशास्त्रं समस्त-वेदार्थ-सार-संग्रह-भूतं वर्तते। तदर्थज्ञानात् समस्त-पुरुषार्थसिद्धिः।

देशे विद्यमानाः प्रजाः यदि आत्मविद्याशालिनो विराजन्ते तर्हि देशहितं सर्वथा संपादितं भवति। क्रान्तिः स्वयमेव शाम्यति। शान्तिः सर्वत्र समाहिता भवति।

इत्थं च ''विद्या ददाति विनयम्'' इति प्राज्ञवचनं आत्म-विद्यापरम्। आत्मविद्या सर्वैरपि संपादयितव्या। तदानीमेव दैवी संपत्तिः परिपूर्णा भवति। सर्वेऽपि सुखेन जीवन्ति। ''देशः ईशस्वरूपः'' इति वक्तुं-पार्यते। सर्वोऽपि अस्माकं मनोरथः विद्यार्थिनां हस्ते वर्तते। अतः गुरुकुलपद्धतिः विद्यार्थिभिः विध्याभ्यास-समये एव समादरणीया।।

उक्तं च-

**सर्वतीर्थावगाहस्य संप्राप्नोति फलं नरः।**
**गुरोः पादोदकं पीत्वा शेषं शिरसि धारयन्।।**

(स्कंदपुराण/गुरुगीता 2/207)

**व्याख्यात्री संस्कृते, सहायकाचार्यः**
**राजकीय मीरा कन्या महाविद्यालयः उदयपुरम्**
**23-24, विद्या नगर, सेक्टर-4, हिरण मगरी,**
**उदयपुर सम्पर्कसूत्रम् : 9413029431**

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**व्याघ्रचौरारिसर्पाग्नितीव्ररोगविषाणि च।**
**एकस्मिन् ददते दुःखं भोगाः संख्यातिगे भवे।।**

- व्याघ्र, चौर, शत्रु, सर्प, अग्नि तीव्ररोग और विषय एक ही जन्म में दुःख देते हैं, परन्तु भोग असंख्य/अनेक भवों में दुःख देते हैं।

**पन्थानौ द्वौ न गम्येते पथिकेन यथा तथा।**
**यद्यक्षसुखमत्यक्षं सुखं न स्यात्कदाचन।।**

- जिस प्रकार एक पथिक के द्वारा दो मार्ग नहीं जाये जाते, उसी प्रकार एक जीव के इन्द्रिय सुख और अतीन्द्रिय सुख नहीं हो सकते।

**प्रार्थयन्ति न सद्भोगानिन्द्रचक्रादिगोचरान्।**
**क्वचिद् भोगान्समीहन्ते मुनयः पापवर्द्धनान्।।**

- मुनि जब, इन्द्र चक्रवर्ती आदि प्रशस्त भोगों की भी कभी चाह नहीं रखते, तब पाप वर्द्धक भोगों की कैसे वांछा करेंगे।

**नैव भोगं त्यजेद्यस्तु मुद्रां गृह्णाति केवलम्।**
**तपश्च ध्यानमौनादि सर्वं तस्य वृथाश्रमः।।**

- जो भोगों को तो छोड़ता नहीं है, केवल मुनि मुद्रा को ग्रहण करता है, उसका तप और ध्यान,मौन आदि सभी व्यर्थ परिश्रम है।

**दुरितकुरुहकन्दं दुःखसंतापबीजं,**
**नरकविषममार्गं धर्मवृक्षानलं च।**
**विकलकरमसारं दुःखपूर्णं त्यज त्वं,**
**मुनिजनघननिन्द्यं सर्वभोगं दुरापम्।।**

- जो पाप रूपी वृक्ष का कन्द है, दुःख रूप संताप का बीज है, नरक का विषममार्ग है, धर्म रूप वृक्ष को भस्म करने के लिए अग्नि है, विकलता को करने वाला असार है, ऐसे दुःख पूर्ण मुनिजन द्वारा निन्दनीय सभी भोगों को छोड़ो।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# गणेशस्य दार्शनिकमहत्त्वम्

❑ डॉ. सुनील कुमार शर्मा

ऋग्वेदादारभ्य विरचितासु विरच्यमानासु च सर्वविधकाव्यविधासु देवानां देवविशेषस्य वा तत्स्वरूपप्रतिपादनविशिष्टा कविप्रतिभयोत्कृष्टकोटीमाविष्टा सहृदयहृदयं प्रविष्टा प्रार्थना प्रसादयति पाठकान्, प्रीणयति प्रार्थिनः, प्रसादयति भक्तान्, साधयति पुरुषार्थान् दूरीकरोति च दुरितानि। एवमेव भगवान्[1] गणेशोऽपि संस्कृतवाङ्मये वैदिके लौकिके चोभयेऽनेकदृष्टिभिर्दृष्टः सृष्टश्चापारे काव्य-संसारे। अस्मिन् लेखे तदीयविग्रहस्य दार्शनिकं महत्त्वं प्रतीकान् च प्रख्यापयितुमायासो विहितोऽस्ति।

श्रीगणेशोत्पत्तिविषयकवृत्तमापाततो बालश्रावणीयं रोचककथानकं वास्तविकोपादानविरहितं पौराणिकमिवाभाति परन्तु कथायाः गूढार्थो वर्तते खलूह्यः, तच्चात्रोपस्थाप्यते-

1. यदा भगवती स्नान्ती आसीत् तदा सहसा भगवतः शिवस्यागमनमभवत् अर्थात् यदा वयं दोषान् दूरीकृत्य निर्मलाः भवामस्तदा परमात्माऽविलम्बेनायातीति ज्ञेयम्।

2. पार्वती वर्तते खलु परा शक्तिः, सैव मूलाधारचक्रे कुण्डलिनीरूपेण विराजते। आध्यात्मिकप्रकृतिरलौकिकप्रकृतिर्वा कुण्डलिनीशक्तिप्राप्तेः सुगमद्वारं वर्तते। अपरिपक्वधियेभ्यो मूलाधारचक्रं रक्षितुं पार्वती गणेशं ससर्ज स्वशरीरस्थहरिद्रालेपांशेन। हरिद्रा पीतवर्णा भवति, मूलाधारचक्रोऽपि पीतवर्णो गणेशश्चापि पीतवर्णाश्रितो वर्तते।

3. प्रथमं पार्वती द्वारे नान्दीमयुङ्क्त। स शिवस्य परमभक्तः सर्वात्मना तत्रानुरक्तोऽस्ति। अतः सहजतयाभिज्ञातः शिवस्तेन द्वारे नावरोधितः। वस्तुतो नन्दी अलौकिक प्रकृतेः प्रतिनिधिरस्ति।

4. यदा शिवः आयाति तदाऽहंकारस्य घनान्धकारेणावृतो जीवः[1] सामान्यतया तं समीपमागतमीश्वरं न जानाति ईश्वरेण सह विवदते किंवा योद्धुमप्युद्यतो जायते। तदानीं दयालुः शिवः शिक्षक इव प्रथमं निर्देशैरुपदेशैर्वा बोधयति ततश्चान्ते अतीव दृढतया स्थितमहंकारं छेदयति। गणेशशिरश्छेदनकथया तथ्यमिदं सूचितम्।

5. गणेशस्य निधनं ज्ञात्वा पार्वती सृष्टिनाशाय तर्जयति। अस्यायमभिप्रायः - देवी भौतिकसंसारस्थः शिवश्च नित्यस्य परमतत्त्वस्य प्रतिनिधित्वेन वर्णितोऽस्त्यत्र। यदाऽहंकारो नश्यते हन्यते वा तदा नश्वरसंसारस्यापि लोपो यतोहि भौतिकसंसारसत्ता तदधीना भवति। शरीरं संसारेणात्मा च परमात्मना सम्बन्धितोऽस्ति। विनष्टेऽहंकारे जीवस्य संसारे रुचिर्न भवति, अपितु स ब्रह्मसायुज्यमपेक्षते। गणेशः पार्वत्या आविर्भावः। अतः पारमार्थिकज्ञानोदयाय गणेशस्याराधना करणीया भवति।

6. गणेशो गणानां समस्तप्राणिनां कीटपतङ्गपशुपक्षिमानवानां सूक्ष्मतमानां खगोलीयानां स्वर्गीयाणां च पतिः स्वामी वर्तते। अत्र गणपदेन[2] सर्वे हि ते प्राणिनोऽभिप्रेताः सन्ति येषां विश्वसर्जनकर्मणि प्राकृतिकशक्तिषु यथा भूकम्पादिषु, मौलिकेषु तात्त्विकेषु वा गुणेषु यथा अग्निजलादिषु, देहावयवक्रियानां प्रक्रियासु च महद्

1. सकलैश्वर्यसम्पन्नात्।

1. अहङ्कारविमूढात्मा कर्त्ताहमितिमन्यते। श्रीमद्भगवद्गीतायाम्।
2. प्रमथादयः शिवसेवका अपि गणपदेन प्रसिद्धाः सन्ति, किन्त्वत्र शोधधियोक्तप्रासंगिकार्थो ग्राह्यः।

योगदानं भवति। तेषां गणानां पूजां विना विहितानि अस्मत्कार्याणि तैरस्वीकृतत्वात् चौरकर्माणीव स्युः। यतो हि गणेशस्य तेषु प्रभुत्वं वर्तते, अतो गणेशार्चनात्तेषामपि पूजनं सञ्जायते। स गणपतिः विघ्नान् विनाश्य बाधाः निरस्य प्रयत्नान् कार्याणि च सफलीकरोति।

इतो यावद् गणेशस्योत्पत्तिविषयकदार्शनिकं विवेचनं प्रस्तुतम्। इदानीं तद् विग्रहमाश्रित्योच्यते–

1. गणेशस्य शिर आत्मतत्त्वं मानवशरीरञ्च मायां संकेतयति। माया पाञ्चभौतिकशरीरस्य भौतिकसत्तां द्योतयति। गजमस्तकं बुद्धिधैर्य-समर्पणानाम्, वक्रतुण्डं च ॐकारस्य प्रतीकं वर्तते। ॐकारश्च सृष्ट्यात्मकसत्य-स्य सुदृढप्रतीकं वर्तते।

2. गणेशस्योपर्युत्थितदक्षिणहस्ते अङ्कुशः प्राणिनः सन्मार्गमानयति। वामहस्ते पाशो भद्रसाधनं विपद्-विदारणस्य। लेखिनीतुल्यो भङ्क्तो गजदन्तः तस्यापर-दक्षिणहस्ते बलिदानस्य प्रतीकम्। महाभारतस्य लेखनाय दन्तोऽयं गणेशेन स्वयं त्रोटितः।[1] तस्यापरहस्ते स्थिता जपमाला ज्ञानानुधावनम् विद्याभ्यासश्च निरन्तरं स्यातामिति शिक्षयति।

3. मोदकं चात्मतत्त्वस्य माधुर्यं व्यनक्ति। अर्थात् बाह्ये अधमस्वार्थस्तथाऽन्तः स्थले मधुरोऽयमात्माऽवतिष्ठते, सोऽन्वेष्य इति।

4. गणेशस्य शूर्पसदृशौ विशालकर्णौ भक्तकृतप्रार्थना-श्रवणोदारौ स्तः। पुनश्च शूर्पो यथा धान्यं तृणतुषादिभ्यो व्यावर्तयति तथैव विवेकेन मायातो ब्रह्म व्यावर्तनीयमिति दार्शनिकपक्षोऽप्यूह्यः।

5. कटिप्रदेशे परिसर्पन् सर्पः सर्वविधोर्जायाः स्रोतः संकेतयति। मूषकस्य वाहनत्वेन स्वीकृतिः गणेशस्य विनम्रतां प्रकटयति। पुनश्च गणेशो विशालकायो मूषकश्च लघुकायः इत्यनेन लघुना सह विशालस्यैकता ध्वन्यते। अपि च कर्तनं मूषकस्य स्वभावः। एतेन प्रत्येकं विघ्नविच्छेदस्य सामर्थ्यं द्योतितम् भवति।

गणेशो गणपतीत्यपरनामधेयः, तस्य नामेदं सर्वथा सार्थकम्। गणानां जनतानां पतिर्नेता गणपतिः। गणेशे सफलयोग्यतमश्रेष्ठनेतुः सर्वे गुणा विद्यन्ते यथा हि–

1. नेता सर्वान् संशृणुयात् – तत्कृते गणेशस्य विशालौ कर्णौ।

2. नेता पर्याप्तसंवेदनशीलः स्याद् येन – सूक्ष्मापि समस्या तदनुभूतावायात्। तत्कृते गणेशस्यातीव संवेदनशीलं लम्बमानं तुण्डं वर्तते।

3. नेता स्वीयं समग्रं ज्ञानं न प्रकाशयेत् – तत्कृते गणेशस्य लम्बोदरम्। न हि परैरुक्तं सर्वं सर्वेभ्यः कथयेत्।

4. गणेशस्य विशालललाटं तीक्ष्णबुद्धेः द्योतकम्।

5. तस्य विचित्रशारीरिकसंरचनया, भग्नदन्तेन, गमना-दिना चोपदिष्टं यद् बाह्यसौन्दर्यस्यान्तरिकपूर्णतायै अनिवार्यता न भवति अर्थात् ब्रह्मप्राप्तौ परिपूर्णतालाभे वा देहसौन्दर्यं हेतुर्नास्ति।

गणेशो मिथ्याचारस्वार्थदर्पानां विनाशकोऽस्ति। तस्य सर्वगुणोपेतस्य विद्यानिकेतस्य गणेशस्य बुद्धिवैभवं विभाव्य व्यासो महाभारतलेखनाय तं न्यवेदयत्। स शिवप्रेमपिण्डो वक्रतुण्डो विश्वकल्याणं कुर्यादिति प्रार्थयामः।

**प्राचार्यः**

**श्री एस.जे.डी. तोला महिला महाविद्यालये**

**सादुलपुरस्थे ( चूरुमण्डलम् )**

1. 'परशुरामेणोत्पाटितैकदन्तो गणेशः' इतिवाचस्पतिः।
'स्कन्देनोत्पाटितदन्तत्वादेकदन्तः' इति रामाश्रमीटीकायाम्।

# सृष्टिकारणविषयकविभिन्नमतानि

❑ डॉ. मुकेशकुमारटेलरः

श्रीसुरजनदासस्वामिमहाभागानां मतानुसारं सृष्टेः कारणविषये पुराणेषु प्रमुखतः चतुर्णां मतानामुल्लेखः प्राप्यते। प्रथमं मतं मार्कण्डेयपुराणे उपलभ्यते यदनुसारं गुण-त्रयात्मकप्रकृतेरिदं सम्पूर्णं चराचरं जातम्। 'अग्निसोमात्मकं जगत्'।[1] इति श्रुतिवाक्यानुसारं अग्नितत्त्वतः जगतः प्रादुर्भावस्य द्वितीयं मतमस्ति यदग्निपुराणे प्रतिपादितम्। परन्त्वेतस्मिन् श्रुतिवाक्ये त्वग्नितत्त्वे सोमतत्त्वे चोभयोरेव तत्त्वयोः सृष्टिकारणता प्रतिपादिता। एतयोरग्निरत्ता सोमश्चान्नस्वरूपं भवति। आहुतिसमये सोमतत्त्वमपि अग्निस्वरूपकं भवत्यतएवाग्नितत्त्वस्यैव प्राधान्यं स्वीक्रियते। 'अस्यैकं सूर्यमेवैकं प्रभवं प्रलयं विदुः। सूर्याग्नितः प्रजायेते अग्नीर्मध्यमपार्थिवौ।' इति बृहद्देवतावचनानुसारं केचन विद्वांसः सूर्यतत्त्वतः सृष्टेरुद्भवं स्वीकुर्वन्ति। मतस्यास्य प्रतिपादनं भविष्यपुराणे कृतमस्ति। 'ब्रह्मैवेदं सर्वम्' इत्यादीनां श्रुतीनां मतानुसारं सम्पूर्णमिदं चराचरं ब्रह्ममयमस्ति अर्थात् ब्रह्मैवास्याः सृष्टेर्मूलकारणमस्ति। सृष्टिः ब्रह्मणो विवर्तमस्तीत्यप्येकं मतमस्ति। मतस्यास्य निरूपणं ब्रह्मवैवर्तपुराणे कृतमस्ति। एवं मार्कण्डेयपुराणे, अग्निपुराणे, भविष्यपुराणे ब्रह्मवैवर्तपुराणे चैतानि चत्वारि सृष्टिकारणता-विषयकमतानि प्रतिपादितानि।[2]

वेदवाचस्पतिश्रीमधुसूदनमहाभागस्य श्रीसुरजनदास-स्वामिमहाभागस्य च चिन्तनमिदमस्माभिरत्र सम्बन्धित-पुराणेष्वलोकनीयम्।

**1. गुणत्रयात्मकप्रकृत्याः सृष्टिः।**

सृष्टिकारणताविषयकं प्रथमं मतमिदं मुख्यरूपेण मार्कण्डेयपुराणे उपलभ्यते। अस्मिन् विषये मार्कण्डेयपुराणे निम्नलिखितं वर्णनं प्राप्यते-

**यदा तु प्रकृतौ याति लयं विश्वमिदं जगत्।**
**तदोच्यते प्राकृतोऽयं विद्वद्भिः प्रतिसञ्चरः।।**
**स्वात्मन्यवस्थिते व्यक्ते विकारे प्रतिसंहृते।**
**प्रकृतिः पुरुषश्चैव साधर्म्येणावतिष्ठतः।।**
**तदा तमश्च सत्त्वञ्च समत्वेन व्यवस्थितौ।**
**अनुद्रिक्तावनूनौ च तत्प्रोतौ च परस्परम्।।**
**तिलेषु वा यथा तैलं घृतं पयसि वा स्थितम्।**
**तथा तमसि सत्त्वे च रजोऽप्यनुसृतं स्थितम्।।**[3]

भावोऽस्ति यद्यदा प्रलयकाले सम्पूर्णं विश्वं प्रकृतौ विलीनं भवति। तदेयं स्थितिर्विद्वद्भिः प्राकृतः लयः कथ्यते। तदा अव्यक्तप्रकृतिः स्वकीये स्वरूपे (साम्यावस्थायां) अवस्थिता भवति महदादिविकाराश्च समाप्ताः भवन्ति। तदा प्रकृतिः पुरुषश्च साधर्म्येण (क्रियाविकारादिरहितावस्थायां) अवतिष्ठतः। तदा सत्त्वतमोगुणावपि साम्यावस्थायां व्यवस्थितौ भवतः। तदा तयोर्न्यूनाधिक्यभावो न भवति। यथा तिलेषु तैलं पयसि च घृतं सन्निहितं भवति तथैव तयोरपि स्थितिर्भवति।

तदा मार्कण्डेयपुराणे प्रतिपाद्यते यत् परमेश्वरेण प्रकृतिपुरुषयोः विक्षोभोऽभवत् तस्माच्च ब्रह्मणः समुद्भवः जातः।[4] तदा स ब्रह्मा निर्गुणो भूत्वापि रजोगुणमङ्गीकृत्य ब्रह्मरूपेण प्रजानां सृष्टिं सम्पादयति। पुनश्च स एव सत्त्व-गुणस्योद्रेकात् विष्णुत्वं प्राप्नोति प्रजानाञ्च परिपालनं करोति। एवमेव तमोगुणस्योद्रेकात् रुद्ररूपं प्राप्य जगतः संहारं करोति। अस्मिन् विषये मार्कण्डेयपुराणे निम्नलिखितं वर्णनं प्राप्यते-

**उत्पन्नः स जगद्योनिरगुणोऽपि रजोगुणम्।**
**भुञ्जन् प्रवर्तते सर्गे ब्रह्मत्वं समुपाश्रितः।।**
**ब्रह्मत्वे स प्रजाः सृष्ट्वा ततः सत्त्वातिरेकवान्।**
**विष्णुत्वमेत्य धर्मेण कुरुते परिपालनम्।।**
**ततस्तमोगुणोद्रिक्तो रुद्रत्वे चाखिलं जगत्।**
**उपसंहृत्य वै शेते त्रैलोक्यं त्रिगुणोऽगुणः।।**
**यथा प्राग्व्यापकः क्षेत्री पालको लावकस्था।**
**यथा स सञ्ज्ञामायाति ब्रह्मविष्णवीशकारिणीम्।।**
**ब्रह्मत्वे सृजते लोकान् रुद्रत्वे संहरत्यपि।**
**विष्णुत्वे चाप्युदासीनस्तिस्रोऽवस्थाः स्मयम्भुवः।।**[5]

अर्थादुत्पन्नः स जगतः योनिस्वरूपः ब्रह्मा सर्गकाले रजोगुणमधिकृत्य ब्रह्मत्वमुपाश्रित्य प्रजानां सृष्टिं करोति। तदनन्तरं सत्त्वगुणस्यातिरेकात् स विष्णुत्वं प्राप्नोति धर्मेण च प्रजानां पालनं करोति। पुनश्च स एव तमोगुणस्योद्रेकात् रुद्रत्वं प्राप्य जगतः संहारं कृत्वा शयनं करोति। अतएव सर्जनपरिपालनसंहारेतिकालेषु त्रिगुणस्वरूपो भूत्वापि स परमेश्वरः तत्त्वतः निर्गुण एव भवति। यथा कृषकः बीजस्य व्यापनं (वपनं) करोति, पालनं (सुरक्षां) करोति अन्ते च

तस्यैव लावकोऽपि भवति तथैव स एव स्वयम्भूः, ब्रह्मा ब्रह्मविष्णुशिवादिसंज्ञाः धारयित्वा ब्रह्मत्वे लोकान् सृजते, रुद्रत्वे संहरति विष्णुत्वे चौदासीनो भूत्वा प्रजानां परिपालनं करोति। एताः स्वयम्भुवः ब्रह्मणः एव तिस्रः (सत्त्वरजतमोगुणयुक्ताः) अवस्थाः सन्ति।

पुनश्च पुराणकारेण मार्कण्डेयपुराणस्य प्रकरणेऽस्मिन् सृष्टेः मूलकारणस्वरूपे ब्रह्मणः एव त्रिगुणत्वस्य प्रतिपादनं क्रियते-

**रजो ब्रह्मा तमो रुद्रो विष्णुः सत्त्वं जगत्पतिः।**
**एत एव त्रयो देवा एत एव त्रयो गुणाः।।**
**अन्योन्यमिथुना ह्येते अन्योन्याश्रयिणस्तथा।**
**क्षणं वियोगो न ह्येषां न त्यजन्ति परस्परम्।।**[6]

तात्पर्यमस्ति यद्रजः एव ब्रह्मास्ति, तमः रुद्रोऽस्ति सत्त्वञ्च विष्णुस्वरूपकं भवति। एते एव त्रयो गुणाः। एते एव त्रयो देवाः। एते अन्योन्याश्रिताः सन्ति। एतेषां कदापि वियोगो न भवति नैवैतेषां कदापि परस्परं त्यागः भवति।

एवं मार्कण्डेयपुराणे गुणत्रयात्मकप्रकृत्याः सृष्टेः प्रतिपादनं भवति।

**2. अग्नितत्त्वतः सृष्टिः**

अग्नितत्त्वतः सृष्टेरुत्पत्तेः वर्णनमग्निपुराणे प्राप्यते। श्रीसुरजनदासस्वामिमहोदयस्य कथनस्यास्य सन्दर्भेऽग्नि-पुराणस्य सर्गवर्णनं द्रष्टव्यम्।

वर्तमानसमये उपलब्धाग्निपुराणस्य सृष्टिवर्णनेऽग्नि-तत्त्वतः जगतः उत्पत्तेर्विषये प्रायः कुत्रापि वर्णनं नोपलभ्यते। पुराणस्यारम्भे एवाग्निदेवस्येयमुक्तिरवश्यमेव प्राप्यते-

**विष्णुः कालाग्निरुद्रोऽहं विद्यासारं वदामि ते।**[7]

अनेन वाक्येनाग्निना इदं प्रतिपादितं यदग्निरेव विष्णुः अस्ति, अग्निरेव कालोऽस्ति अग्निरेव च रुद्रोऽस्ति। पूर्वं गुणत्रयात्मकप्रकृत्याः सृष्टेः प्रतिपादनमिव अत्रापीदं सङ्क्षिप्तरूपेण प्रतिपादितं भवति यद्यथा सत्त्वादित्रयो गुणाः एव जगतः सृजक-परिपालक-संहारकस्वरूपाः देवाः सन्ति तथैवाग्निः स्वयं ब्रह्मरूपं धारयित्वा जगतः सृजनं करोति, विष्णुरूपं धारयित्वा जगतः पालनं करोति रुद्ररूपे चास्य सम्पूर्णविश्वस्य संहारं करोति।

अष्टादशपुराणपरिचये एकाशीतिरधिकशताध्याय-परिमितस्यापरस्याग्नेय- पुराणस्योप्युल्लेखः कृतः। तत्रापि केवलं 'लग्नस्तवः' इति नाम्ना एकोऽध्यायः प्राप्यते।

**3. सूर्यतत्त्वतः सृष्टिः**

भविष्यपुराणे प्रायः सूर्यदेवस्य प्राधान्यं मन्यते एतस्मादेव कारणादेतत् सौरपुराणेषु परिगण्यते। यद्यप्यष्टादशपुराणदर्पण-कारेणोल्लिखितं यद् भविष्योत्तरपुराणसहितं भविष्यपुराणस्य चत्वारि संस्करणान्युपलभ्यन्ते। तेषां विश्लेषणेन मतं यत् किमपि संस्करणमादिभविष्यपुराणरूपे ग्राह्यं नास्ति।[8] मयात्र संस्कृतिसंस्थानबरेलीतः प्रकाशितं पं. श्रीरामशर्माचार्य-महोदयेन सम्पादितं संस्करणं, वेङ्कटेश्वरप्रेसमुम्बईतश्च प्रकाशितं संस्करणं दृष्टम्।

पुराणस्यास्य पं. श्रीरामशर्माचार्यमहोदयेन सम्पादिते संस्करणे ब्राह्मपर्वे सप्तदशेऽध्याये सूर्यस्य विराट्-स्वरूपस्य वर्णनं कृतम्। पुराणेऽस्मिन् सूर्यः जगतोऽ-व्यक्तकारणरूपे परब्रह्मस्वरूपे च प्रतिष्ठितः। तत्रोक्तम्-

**अव्यक्तकारणं यत्तन्नित्यं सदसदात्मकम्।**
**प्रधानं प्रकृतिश्चेति यमाहुस्तत्त्वचिन्तकाः।।**
**गन्धैर्वर्णै रसैर्हीनं शब्दस्पर्शविवर्जितम्।**
**जगद्योनिं महद्भूतं परंब्रह्म सनातनम्।।**
**निग्रहं सर्वभूतानामव्यक्तमभवत्किल।**
**अनाद्यन्तमजं सूक्ष्मं त्रिगुणप्रभवोऽपययम्।।**
**अनाकारमविज्ञेयं तमाहुः पुरुषं परम्।**
**तस्यात्मना सर्वमिदं जगद्व्याप्तं महात्मनः।।**
**तस्येश्वरस्य प्रतिमा ज्ञानवैराग्य लक्षणा।**
**धर्मैश्वर्यकृता बुद्धिर्ब्राह्मी तस्याभिमानिनः।।**[9]

अर्थाद्यज्जगतोऽव्यक्तकारणमस्ति, यन्नित्यं सद-सदात्मकस्वरूपयुक्तमस्ति, यं प्रधानं प्रकृतिश्चेति नामभ्यामा-ह्वयन्ति, यत् गन्धवर्णादिभिः हीनमस्ति, यच्छब्दस्पर्शादिभिः ज्ञातुं न शक्यते, यज्जगतः योनिस्वरूपमस्ति, महद्भूतमस्ति, सनातनं परं ब्रह्म अस्ति, यत् सर्वेषां भूतानां निग्रहमव्यक्त-मासीत्, यदनाद्यन्तमजं सूक्ष्ममस्ति, सत्त्वरजतमोगुणादियुक्त-प्रभवोऽप्ययमेवास्ति, यदनाकारमविज्ञेयञ्चास्ति तमेव चिन्तकाः परं पुरुषमप्याह्वयन्ति। तस्य महात्मनः आत्मनेवेदं सर्व जगद्व्याप्तमस्ति। तस्य ईश्वरस्य प्रतिमा ज्ञानवैराग्ययुक्ता भवति। तस्याभिमानिनः धर्मैश्वर्ययुक्ता बुद्धिः ब्राह्मी कथ्यते।

एतदनन्तरं जगतः कारणस्वरूपत्रिगुणात्मकस्वरूपेऽपि भगवतः आदित्यस्य एवं प्रतिष्ठापना क्रियते-

**सहस्रमूर्धा पुरुषस्तिस्रोऽवस्थाः स्वयम्भुवः।**
**सत्त्वं रजश्च ब्रह्मत्वे कालत्वे च रजस्तमः।।**

**सात्त्विकं पुरुषत्वे च गुणवृत्तिः स्वयम्भुवः।**
**ब्रह्मत्वे सृजते लोकान्कालत्वे चापि सङ्क्षिपेत्।।**
**पुरुषत्वे उदासीनस्तिस्रोऽवस्थाः प्रजापतेः।**
**त्रिधा विभज्य चात्मानं त्रिकालं सम्प्रवर्त्तते।।**
**सृजते ग्रसते चैव वीक्षते च त्रिभिः स्वयम्।।**[10]

भावोऽस्ति यत् स पुरुषः सहस्रमूर्धायुक्तो भवति। तस्य स्वयम्भुवः तिस्रोऽवस्थाः भवन्ति। ब्रह्मत्वे स सत्त्वरजोयुक्तः, कालत्वे रजस्तमोभ्याञ्च युक्तः, पुनश्च पुरुषत्वे स सात्त्विकगुणयुक्तो भवति। ब्रह्मत्वे (ब्रह्मरूपं धारयित्वा) स लोकानां सर्जनं करोति, कालत्वे (रुद्ररूपं धारयित्वा) लोकानां सङ्क्षेपणं (संहारं) करोति पुरुषरूपे (विष्णुरूपं धारयित्वा) च सः उदासीनो भूत्वा प्रजानां पालनं करोति। इत्येताः प्रजापतेः त्रिगुणयुक्ताः तिस्रोऽवस्थाः विद्यन्ते। एवं स आदित्यः स्वात्मानं त्रिधा विभज्य त्रिषु कालेषु सम्प्रवर्त्तते। एताभिरेव तिसृभिरवस्थाभिः स लोकानां सर्जनं वीक्षणं ग्रसनञ्च करोति। एवं भविष्यपुराणे भगवान् सूर्य एव सृष्टेर्मूलकारणरूपे प्रतिष्ठापितः।

**4. ब्रह्मणः सृष्टिः**

प्रायः सर्वाणि पुराणानि प्रत्यक्षाप्रत्यक्षरूपेण ब्रह्मतः एव सृष्टेरुद्भवं स्वीकुर्वन्ति। अस्मिन् विषये सुरजनदास-स्वामिमहाभागाः कथयन्ति यत् 'अथ वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'[11] इति श्रुत्यनुसारं सर्वमिदं प्रपञ्चं विकारमात्रमेवास्ति। एतत् सर्वं केवलं वाचारम्भमात्रमेवास्ति। वस्तुतः ब्रह्म एव सत्यमस्ति। ब्रह्मतः एवाखिला सृष्टिरुत्पद्यते तथापि ब्रह्म असङ्गं निर्विकारञ्चास्ति। अतएव तस्मादियं ससङ्गसृष्टिर्न सम्भवा। अतएव मतिरियमेव क्रियते यद्रज्जौ सर्पभ्रान्तिवत् सृष्टिरियमपि ब्रह्मणि कल्पितास्ति। एवं ब्रह्म भ्रान्तिकल्पितस्य जगतः (विवर्तरूपसृष्टेः) कारणं सिद्धं भवति। एतस्यैव मतस्य प्रतिपादनं ब्रह्मवैवर्तपुराणे कृतमस्ति।[12]

ब्रह्मवैवर्तपुराणस्य प्रथमाध्याये एव पुराणस्यास्य परिचयस्वरूपे सौतिनोक्तम्-

**विवृत्तं ब्रह्म कात्स्न्यं च कृष्णेन यत्र शौनक।।**
**ब्रह्मवैवर्त्तकं तेन प्रवदन्ति पुराविदः।।**

अर्थादस्मिन् पुराणे भगवता कृष्णेन स्वकीयं सम्पूर्णं ब्रह्मत्वं विवृत्तमेतस्माद कारणादेव पुराणविद्भिरिदं पुराणं ब्रह्मवैवर्त्तकमिति नाम्ना सम्बुध्यते।

परब्रह्मणः तद्विवर्तजीवात्मनश्च स्वरूपस्यैकत्वं वर्णयता पुराणकारेणोल्लिखितम्-

**जीवस्तत्प्रतिबिम्बं च सर्वभोगी हि कर्मणाम्।**
**यथाऽर्कश्चन्द्रयोर्बिम्बं जलपूर्णघटेषु च।।**
**बिम्बं घटेषु भग्नेषु प्रलीनं चन्द्रसूर्ययोः।**
**तथा लयप्रसङ्गे स जीवो ब्रह्मणि लीयते।।**
**एकमेव परं ब्रह्म शेषे वत्स भवक्षये।**
**वयं प्रलीनास्तत्रैव जगदेतच्चराचरम्।**[13]

तात्पर्यमस्ति यज्जीवः परमात्मन एव प्रतिबिम्बस्वरूपः कर्मणाञ्च फलभोगी भवति। यथा जलपूर्णघटेषु सूर्यचन्द्रयोः प्रतिबिम्बं दृश्यते घटेषु च भग्नेषु तद्बिम्बं सूर्यचन्द्रयोः प्रलीनं भवति (लुप्तं भवति) तथैव प्रलयकाले जीवोऽपि प्रतिबिम्ब-वत् ब्रह्मण्येव लीयते। सम्पूर्णजगतः समाप्तौ केवलमेकमेव परं ब्रह्मावशिष्टं भवति। तदा एतच्चराचरं जगत् ब्रह्मण्येव प्रलीनं भवति।

अत्र पुराणकारेण प्रतिपादितं यदिदं सर्वं चराचरं जगत् सर्वे च जीवाः तस्य ब्रह्मणः एव प्रतिबिम्बस्वरूपाः (विवर्तरूपकाः) सन्ति। प्रतिसर्गकाले सर्वे तस्मिन्नेव समाहिताः भवन्ति।

**5. सृष्ट्या अवान्तरकारणानि**

यद्यपि सृष्टेर्मूलकारणं भगवान् प्रजापतिः मन्यते किन्तु विभिन्नेषु पुराणेषु कानिचनावान्तरकारणान्यप्युद्घोषितानि यानि भगवतः प्रजापतेरवताराः कथ्यन्ते। एतानि सृष्टिकारणानि सन्ति- 1. महद्ब्रह्मसञ्ज्ञकमक्षरं लिङ्गम् 2. वराहः 3. स्कन्दनाम्ना कुमाराग्निः 4. वामनः (त्रिविक्रमः विष्णुः) 5. कूर्मः 6. मत्स्यश्चेति। एतेषामवान्तरकारणानां प्रतिपादनं क्रमशः लिङ्गपुराणे, वराहपुराणे, स्कन्दपुराणे, वामनपुराणे, कूर्मपुराणे मत्स्यपुराणे चाभवत्।।[14]

1. बृहज्जावालोपनिषत् 2/4, 2. पुराण-रहस्य पृ.स.0-52, 3. मार्कण्डेयपुराण 46/3-6, 4. मार्कण्डेयपुराण 46/7-12, 5. मार्कण्डेयपुराण 46/13-17, 6. मार्कण्डेयपुराण 46/18-19, 7. अग्निपुराण 1/13, 8. अष्टादशपुराणदर्पण पृ.सं. 0-236-237, 9. भविष्यपुराण 1/17/2-6 ब्रह्मपर्व सूर्यस्य विराट्रूपवर्णनम्, 10. भविष्यपुराण 1/17/8-11 ब्रह्मपर्व सूर्यस्य विराट्रूपवर्णनम्, 11. छान्दोग्योपनिषदि 6/1/4, 12. पुराण रहस्य पं.सं. 0-34, 13. ब्रह्मवैवर्तपुराण ब्रह्मखण्डे 28/15-17, 14. पुराण रहस्य पं.सं. 0-52-53

**शिक्षकः, केन्द्रीयविद्यालयः, झुंझुनूंनगरम्**

# भारतीयधर्मस्य स्वरूपम्

❑ कैलाशचन्द बुनकर

भातीयसंस्कृतौ विशेषत: धर्मे विभिन्नविचारकै: भिन्न-भिन्न प्रकारेण दृष्टिपात: कृत: वस्तुत: केचिद् अस्य रहस्यं ज्ञातवन्त: अपरे केचित्तु एतस्य वास्तविकं तत्वम् अविज्ञाय स्वकीयाया आलोचनात्मकप्रतिभाया: दुरुपयोगमेव कृतवन्त:। वस्तुत: भारतीयधर्मो हिन्दुधर्मो वा केनाप्येकेन विशिष्टशब्देन प्रकटयितुमशक्य:। जॉन मैंकेन्जीमहोदयेन साधु परामृष्टं यदत्र धर्मे-रिलीजन-वर्च्यू-लॉ-ड्यूटी-इत्येतेषां चतुर्णामपि पदानां अर्थ: समाहितोऽस्ति। परन्तु मैकेन्जीमहोदयस्य एतत् कथनं भ्रान्तिपूर्णमेवास्ति यत् हिन्दुभि: धर्मस्य अन्येभ्य: व्यवस्थितनियमेभ्य: पृथक्करणं न कृतम् कदाचित् अज्ञानतावशात् एतत्कृतं स्यात्। वस्तुत: हिन्दूधर्म: अतीव व्यापकोऽस्ति। एष: धर्म: जीवनस्य विविधपक्षेषु ऐक्यं स्थापयति। समन्वय एव एतस्य मूलमन्त्र:। मानवजीवने धर्मार्थकाममोक्षरूपपुरुषार्था: समन्विता: सन्त: उपयोगिनो भवन्ति, न तु पृथग्भूता:। हिन्दूधर्म: आदर्शवादी एव नास्ति अपितु व्यावहारिकजीवने वस्तुस्थिते: आदर्शस्य च मध्ये समन्वयं विदधाति। न चैषो धर्म: मानवात् पृथग्भूतोऽस्ति। एतत्तस्य मौलिकं वैशिष्ट्यं, येन विना मनुष्यत्वमेव न सम्भवति। पशौ धर्महीनमनुष्ये च नास्ति कश्चिद्भेद: अत: भारतीयधर्म: मानवव्यक्तित्वेन सम्बद्धोऽस्ति।

एष: मानवस्य लघु कार्येष्वपि दृष्टिं निक्षिपति, तेषां नियमनञ्चापि करोति। मनुष्यं प्रत्येकम् अवस्थायां समानस्वरूपेण पश्यति-सुखे दु:खे, सम्पत्तौ, विपत्तौ चापि। तस्य सामाजिक-पारिवारिक वैयक्तिकपार-लौकिकसर्वविधजीवनं विमृशति। तं च तथा व्याप्नोति येन तस्य समग्रं जीवनं धर्ममयं प्रतिभाति। संस्काराणां शृंखला रेलयानमार्ग इव निर्मितास्ति यां विना जीवनयात्रा अनर्थपरम्परायामेव निपतति। मानवजीवने शैशव-यौवनादि अवस्था: तदनुगुणं आश्रमव्यवस्थाविधानं च संस्काराणां व्यवस्थां भृशं पुष्णाति। धर्मेण सह जीवनस्य तादात्म्यम् अतीव स्पष्टं वर्तते येन पाश्चात्यविद्वांसोऽपि भारतीयधर्मस्य एतद्वैशिष्ट्येन प्रभाविता दृश्यन्ते। प्रो. माक्सक्यूल्लेर: महोदय: एतत् स्वरूपं सम्यग् अवगत्य कथयति यत् ''प्राचीनसमये भारतीयेषु एष: धर्म अन्यविषय इव रुचिविषय नासीत्। अपितु सर्वेषामपि तेषाम् आत्मार्पणात्मिक: रुचिविषय अवर्तत। अस्मिन् केवलं पूजा-प्रार्थनादय एव न गण्यन्ते स्म, अपितु यान्यपि दर्शन-नैतिकता-विधि-शासनादीनि सन्ति। सर्वमपि धर्ममयम् आसीत्। तेषां सम्पूर्णजीवनं धर्ममयम् एवासीत्। अन्यत्, सर्वं सुखसौविध्यं साधनरूपम् आवश्यकतापूर्तिमात्रं गण्यतेस्म।''

''धर्मो रक्षति रक्षित:'' धर्महीनम् उच्छृंखलं च जीवनं विनाशं प्रति विक्रियां प्रति च नयति। धर्मश्चैष: विशिष्टम् उद्देश्यं प्रददाति। तं प्रति सुनिश्चितं मार्गं च प्रदर्शयति येन मनुष्य: स्वविकासं कर्तुं शक्नोति। जीवनस्य कर्तव्यं पालयति। परलोकस्य स्पृहायां कल्पनाया: तरंगै: प्रवाहिता कवे: कृति: नास्ति अपितु वास्तविकजीवनस्य अनुभूते: अभिव्यक्ति: वर्तते।

माक्सक्यूल्लेर: भारतीयचरित्रस्य विशेषतां कथयति-एतत् पारलौकिकं भवति। मां कश्चिद् भारतीयचरित्रस्य वैशिष्ट्यं वक्तुं कथयेत् तर्हि अहं कथयिष्यामि यत् एतत् पारलौकिकमस्ति। ''भारतीयचरित्रे पारलौकिकमनो-

वृत्तिः कस्यचिद् अन्यस्य देशस्य अपेक्षया अधिकं प्राधान्यं प्राप्नोत्'' भारतीयधर्मः दर्शनं च परस्परं पृथक् न स्तः अपितु एकस्यैव वस्तुनः पक्षद्वयमस्ति। भारतीय-धर्मस्य दर्शनेन नीत्या च विशिष्टसम्बन्धो वर्तते। धर्मेण सह अर्थकाममोक्षाणां समन्वयः भारतीयजीवनस्य उद्देश्यं वर्तते। अत एव एष धर्मः सन्तुलितः आदर्शवादी यथार्थवादी वर्तते। लौकिकोऽस्ति, पारलौकिकश्च आध्यात्मिकोऽस्ति भौतिकश्चापि। सः आचरणीयं तत्वं चापि। एकेन पाश्चात्यालोचकेन कथ्यते। ''भारतस्य आध्यात्मिक इतिहासः तस्य मौलिकविचारेण घनिष्ठं सम्बद्धो वर्तते। एतत् चिन्तयितुमशक्यं यत् संस्कृतिरियं सहस्रवर्षेभ्यः पुष्पिता-पल्लविता दृश्यते, एतस्याः मूलं तथा गम्भीरं सुदृढं चास्ति। न अस्थास्यत् यदि अस्यां महान्ति चिरस्थायीनि च मूल्यानि नाभविष्यन्। भारतीयधर्मे मानवीयप्रतिभायाः विकसितरूपस्य उपयोगः दृष्टिपथमवतरति, तस्मिन् मानवजीवनस्य अनेकासु समस्यासु सम्यक् विचिन्त्य व्यवस्था प्रदत्ताऽस्ति। माक्सक्युल्लेरः भारतीय-धर्म-संस्कृतेः च उपलब्धीनाम्-एतेषु शब्देषु उल्लेखमकरोत्। आचारः धर्मस्य मूलं धर्मस्य च ज्ञानेन सह तस्य अनुष्ठानं व्यवहारश्च एव तस्य वास्तविकं प्रयोजनं साधयति।'' गौतमधर्मसूत्रस्य शब्देषु ''धर्मिणां विशेषेण स्वर्गलोकं धर्मविदाप्नोति ज्ञानाभिनिवेशाभ्याम्'' अस्य धर्मस्य शाश्वतसंदेशो वर्तते-

**धर्मं चरत माधर्मं सत्यं वदत मानृतम्।**
**दीर्घं पश्यत मा ह्रस्वं परं पश्यत मापरम्।।**
**वसिष्ठ धर्मसूत्राणि**

अपरञ्च -


**आहार-निद्रा-भय-मैथुनञ्च,**
**सामान्यमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो**
**धर्मेण हीनाः पशुभिस्समानाः।।**

**शोधार्थी**
**वेद-विभाग ज.रा.रा.सं., वि. वि. जयपुर**

**संस्कृतसमाचाराः**

❑ **प्रधानसम्पादकः**

# प्रो. गौड़ः बाणभट्टपुरस्कारेण सभाजयिष्यते



उत्तरप्रदेश-संस्कृत-संस्थानेन संस्कृतविदुषां कृते विगतवर्षीयाणां पुरस्काराणा-मुद्घोषणा कृता। तत्र बाणभट्ट-पुरस्कारः श्री डा. सर्वपल्लीराधाकृष्णन् राजस्थान आयुर्वेद विश्वविद्यालयस्य कुलपतिचराय श्रीमते बनवारीलाल-गौड़ महानुभावाय तत्प्रणीतायै आयुर्वेदीयकथाष्टकम् इति गद्यरचनायै प्रदास्यते। पुरस्कारस्वरूपे एकपञ्चाशत् सहस्ररूप्यकाणि निर्धारितानि। उल्लेखनीयमिदं यद् गौड़महाशयो राष्ट्रीय आयुर्वेद संस्थानस्य जयपुरस्थस्य भूतपूर्वो निदेशकोऽप्यस्ति। एतेषां एकत्रिंशत् कृतयः, पञ्चाशत् तोऽप्यधिकाः संस्कृताङ्गलहिन्दीभाषासु आलेखाः उपनिबद्धाः प्रकाशिताश्च। भारतीपरिवारस्तदर्थं प्रो. गौडमहाशयं सबहुमानं साधुवादैः सम्मानयति। साम्प्रतमेते राजस्थानसंस्कृतसाहित्यसम्मेलनस्य कार्याध्यक्षतामपि निर्वाहयन्तीति संसूच्यते कलावटियेत्युपाह्वेन राधेश्यामेन।

अनूहितकथा-

# खल्वाटः पतिः

❑ मूललेखकः - एम.बी.जे. भुवनेश्वर राव
अनुवादकः - डॉ. सत्यव्रत वर्मा

काऽपि योषा सुरूपं पतिं नेहते। सचेता भर्ता भवति तस्याः प्रियः। नेदं ममेष्टम्। अहं तु पूर्वमेव परिणीताऽस्मि। परं स्वामिवर्य्य, मम पतिः सदैव सम्यग् आचरेत्, न च स परकीयां स्त्रियं पश्येत्। एतत् त्वयैव विधेयम्, सा हृद्गतं भावं स्वामिने निश्छलं न्यवेदयत्।

वत्से, किमेवं चिन्तयसि त्वम्? स्वामी तां मन्दम् अप्राक्षीत्। मम पितामहस्य द्वे जाये आस्ताम्, इत्थं द्वे पितामह्यौ मेऽभूताम्। मम श्वशुरस्यापि भार्याद्वयमवर्तत, इत्थं च मे श्वश्रूद्वयमभूत्। मम भ्रातुरपि द्वे पत्न्यौ स्तः, इत्थं च मे द्वे भ्रातृजाये भवतः। न ममैतादृशो व्यतिकरः स्यात्। यथा मदीय एकः पतिरस्ति तथाऽहमपि तदीयैकैव जाया स्याम्। स्वामिचरणाः, आशीरेषा मयि नूनं वितीर्या। एतदभिधाय सा तस्य चरणयोर्न्यपतत्।

पूर्णकामास्याः, इत्याशिषा तां संवर्ध्य स मन्दस्वरेण तस्याः कर्णे किंचिदव्यक्तं न्यगादीत्।

'अहो मे भाग्यम्' इत्युदीर्य सा सामोदा ततो निरगच्छत्। अष्टौ वर्षाण्यद्य सत्यवती-सुब्बारावयोः परिणीतयोः। कोविदा वदन्ति यद् दम्पत्योः प्रेमा-विवाह दष्टवर्षानन्तरं शैथिल्यं याति। तदा तयोर्दृक् परकीयौ स्त्रीपुरुषौ प्रति प्रसरति। इदानीं कस्मिन्नपि क्षणे कश्चिद् दुःखाकर उदन्तो मम कर्णकुहरयोः पतितुं शक्नुयादिति भीः सत्यवत्या हृदि पदमकरोत्। कोपाध्मातमपि भर्तारं साऽधुना पूर्ववन् न संक्रुध्यति, भूरिणा संयमेन च तस्मिन् व्यवहरति।

सा सुब्बारावेण बहुशः प्रेमालापं करोति, अकालहीनं च तस्य छन्दम् अनुसरति। तस्य कार्यालये कार्यालयमार्गेऽपि तया चराः प्रयुक्ताः। सुब्बारावः कस्यामपि परकीयायां दृष्टिमपि न पातयेदित्यभूत् तस्याः समीहा। तदर्थं सा सर्वात्मना प्रायतत। शुभोदर्कश्चाभूत् तस्याः प्रयासः। तस्या अध्यवसायस्य परिणामोऽनुकूल एवाजनि।

एकदा सुब्बारावः तस्य शिरस् तैलेनाऽञ्जयितुं प्रैरिरत्। तदैवेदं रहस्यं स्फुटतामगात् यत् केशपातेन तस्य शिरसि खलतिः (खल्वाटत्वं) स्पष्टं दृश्यते। तदा प्रभृति सत्यवती निशि निश्शंकम् अस्वाप्सीत् (अस्वपत्) कश्चिदब्रवीत्- अरे ! सुब्बारावः - खल्वाटो जातः। अपर आह-न खल्वाटः, तस्य भाग्योदयो जातः। स ब्रह्मानन्दम् इव हास्याभिनेता रामिरेड्डीव खलनायको वा भविताऽचिरेण।

सुब्बारावस्य खलतिम् अभिलक्ष्य सर्वे स्वैरं वक्तुं प्रारभन्त। स मनसोद्विग्नोऽजायत। कोऽपि मम खलतिं द्रष्टुं न पारयेद् इति कृत्वा सुब्बारावः टोपीनामधेयं शिरोवेष्टनम् अक्रीणात् शिरसा च तदधत्त। तस्येदं वेष्टनं तथा ख्यातिमविन्दद् यत्स टोपीसुब्बाराव इति नाम्नैव विश्रुतोऽभवत्।

सुब्बारावोऽचिन्तयत्- कियानपि व्ययः स्याद् खलतिं प्रतिविधातुम् (अपाकर्तुम्) ओषधिर्नूनं सेवनीया। स तत्कालं भिषजमुपेतः। वैद्योऽब्रवीत् हिमालयलभ्यौषधिभिर् निर्मितं 'भगंधर' तैलमस्ति। तत्प्रयोगेन सप्ताहेन वा वर्षेण वा ते खलतिर् व्यपैष्यति, घनाः केशाश्चोद्गमिष्यन्ति।

सुब्बाराव आवेशस्य गमनीयोऽभूत्। क्षणमपि मया खल्वाटेन न स्थातव्यम्। तिष्ठामि चेत्, न जाने कियतस्तिरस्कारस्य भाजनं भवेयम्। प्रतिविधानं करणीयमेव। तदैव स 'वीकली' इत्याख्ये साप्ताहिके पत्रे विज्ञापनमद्राक्षीत्- खल्वाटे शिरसि होरया केशा जायन्ते। विज्ञापनं प्रपठ्य स सत्वरं हैदराबादं प्रति प्रातिष्ठत।

''सुब्बारावो नास्ति, भोः, हैदराबादं स गतः।'' द्वारमाघ्नन्तं (खटखटाते हुए) पतिम् अप्रत्यभिज्ञाय (न पहचान कर) सत्यवती द्वारं प्यदधात् (पिहित मकरोत्)।

सुब्बारावस्य कनिष्ठा तनयाऽवादीत्- 'न त्वं मे तातः। अस्मान् प्रतारयितुम् (वञ्चयितुम्)आगतस्त्वं स्तेनोऽसि।'

वत्से, जामाता हैदराबादं यातः। अन्यैः पुरुषैस्त्वं किं सम्भाषसे?, तत्रायाता सत्यवतीजननी तामब्रवीत्।

केशगुम्फनं (हेयर वीविंग) कारयित्वा प्रतिनिवृत्तः सुब्बाराव एतैर् व्यतिकरैर् आनन्दसम्मिश्रे आश्चर्ये न्यमज्जत्।

इत्थमेव चेत् सुब्बारावो दृश्यतेऽनागते के केऽपायास् तस्य स्युरिति सम्यग् बुद्धिमारोहत् सत्यवत्या इदानीम्।

रात्र्यां दशवादनं तदाऽभूत्। सुब्बारावः सस्वनं श्वसन् गाढं निद्रितोऽभूत्। गृहकार्यं परिसमाप्य सत्यवती कक्षं प्राविशत्। सुब्बारावम् उद्बोध्य साऽप्राक्षीत्-कथं स्वपिषि त्वमत्र? मृतमूषकस्य दुर्गन्धोऽत्र प्रसृतः। कक्षे आखुः प्रयत्नेनान्विष्टः परं कुत्रचिदपि न स दृष्टः, न च दुर्गन्धो व्यपगतः।

अन्ततः सत्यवती अवादीत्- कुत्र मार्गयसि मूषकं त्वम्? दुर्गन्धस्तु त्वत्तः प्रसरति। तव शिरसि यः कृत्रिम केशपाशो (विग) वर्तते ततो निस्सरति दुर्गन्धः। किं त्वमुद्वेगं कण्डूतिं वा नाऽनुभवसि?

सत्याया वचनम् असत्यं नासीत्। सोऽचिरं केशपाशम् अवमुच्य पांसुषु प्राक्षिपत् स्नानं चाचरत्।

सुब्बाराव आत्मानं सर्वात्मनाऽलंकृत्य कस्यचित् सम्बन्धिनो विवाहेऽगात् स बहुमूल्यं परिधानं स्वर्णवलयं च अधारयत् महार्घेण गन्धद्रवेण चात्मानम् असिञ्चत्। स तथा विभूषितोऽभूद् यत् कश्चिदपि तं प्रत्यभिज्ञातुं नाशक्नोत्। तैर्खल्वाटः सुब्बाराव इतः पूर्वं कदापि नाऽदृश्यतेति।

भोजनं कुर्वाणाः केचिज्जनाः सुब्बारावेण सह सम्भाषितुं प्रवृत्ताः। ते तस्याज्ञातचरा एवासन्। अनेनालापेन सुब्बारावः सुतरां प्रासीदत्। तदैव तेष्वेकस्य वचस्तस्य मनः क्षुरवदविध्यत्। एतद्धि तद्वचोऽभूत्- अस्माकं वर्षीयसां (वृद्धानां) समारोहेष्वागमनं नोचितम्। अल्पमेवावशिष्यते नो जीवनस्य तथापि विवाहोत्सवेषूपस्थातव्यमेवाऽस्माभिः। सुब्बारावस् तस्माद् वृद्धाद् भूयसाऽवरोऽभूत्। खल्वाटशिरसः कारणादेव स वृद्धैः सह तत्राध्यास्त। वृद्धवर्य्यस्यारुन्तुदं वचः स्मृत्वा सुब्बारावो निद्रायामपि उद्विग्नो जायते स्म।

तदैव सत्याऽऽदिदेश - भोः, मत्पितृपक्षतो गृहीतस्य यौतुकस्यार्धं तेभ्यो निर्यातनीयम्।

किमर्थं निर्यातनीयं तद् यौतुकम्? सम्भ्रमेणाऽपृच्छत् सुब्बारावः। विवाहकाले सघनं केशराशिं दधानस्त्वं सुतराम् अशोभत। तत्कारणादेव एतावद् यौतुकं तेऽदायि। सम्प्रति केशहीनत्वात्ते सौन्दर्यम् अन्तर्हितम्। तेन त्वया यौतुकं निर्यातनीयम्।

सत्ये, सत्ये, स तारस्वरेणाक्रन्दत्। किं वृत्तं भोः? सत्या महानसात् ससम्भ्रमं तत्र प्राप्ता। सत्यं ब्रूहि, सत्ये। अपि त्वं खल्वाटात् पत्युर् जुगुप्ससे?, स आर्तस्वरेणाऽ-प्राक्षीत्। धिक् ! लघीयानेष प्रश्नः। त्वं खल्वाटः स्या इत्यहमेव स्वामिवर्य्यं सप्रश्रयं न्यवेदयम्।

किं त्वं मे खलतिं वरयामास? नाहं ते खलतिमवरयं परं त्वां खल्वाटं विलोक्य हर्षप्रकर्षो मेऽजायत, सत्या विक्षुब्धम् अवोचत्।

त्वत्कृते खलतिः शापः स्यात्, मत्कृते तु वरोऽस्ति, केषाञ्चित् सुकृतानां फलम्। मम संयतजीवनेऽपि ते केशहीनत्वं कारणतामेति। त्वदीयं केशविहीनं शीरो वीक्ष्य कापि बाला त्वां मातुलम् आवुत्तं वा न वक्ष्यति, 'पितामह' इत्युदीर्यैवाऽऽकारयिष्यति। त्वं पत्नीव्रतः स्थास्यसि, मम काऽपि सपत्नी न भविष्यति। सर्वे तन्मे मोदाय भवति इति त्वरितम् अवादीत् सा।

अस्ति अन्यदप्येकं रहस्यम्। ब्रूयां किं तत्? वैद्येन खलतिवारणाय दत्ते तैलेऽस्माभिर्नारिकेलतैलं मिश्रितम्, ओषधयश्च विपर्यस्ताः। कृत्रिमकेशपाशनिरासाय मूषकव्याज आरचितः। सर्वमिदं स्वामिवर्य्याणां प्रेरणया कृतम्। अपि त्वं मे क्रोत्स्यसि, सत्या मन्दम् अवाक्षीत्।

सुब्बारावमहाशयो मौनमभजत्। किमपि तस्य बुद्धिं नारोहत्, स विस्मयस्य पराकाष्ठाम् अगमत्। स केवलं शिरः कम्पमानोऽतिष्ठत्।

**पूर्वः प्राचार्यः मानदः प्रोफेसरश्च**
**7/34, पुरानी आबादी**
**नामदेव फ्लोर मिल के पास,**
**श्रीगंगानगर-335001 (राज.)**

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्णः शरणं मम )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

( पूर्वानुवृत्तम् )

नन्दगोपसुतः कृष्णो गोपिकाभिर्वृतः पतिः।
कात्यायिन्यर्पितास्माभिः श्रीकृष्णः शरणं मम।। 351।।
कृष्णः शुचिस्मितोऽकुण्ठमेधाः प्रेमपरिप्लुतः।
संस्तुतो गोपकन्याभिः श्रीकृष्णः शरणं मम।। 352।।
आनीतं द्विजपत्नीभिरन्नं भोज्यं चतुर्विधम्।
सगोपः सबलो भुञ्जन् श्रीकृष्णः शरणं मम।। 353।।
व्रजेऽद्रिगोद्विजाग्निभ्यो नन्दाद्यैर्गोपवृत्तिभिः।
यज्ञेशोऽयाजयत्कृष्णः श्रीकृष्णः शरणं मम।। 354।।
कृष्णो विश्वं हि कृष्णेन कृष्णात्कृष्णश्चराचरम्।
परस्माच्च परः कृष्णः श्रीकृष्णः शरणं मम।। 355।।
शक्रदर्पहरः कृष्णो गोपालः सप्तहायनः।
सप्ताहमदधाददद्रिं श्रीकृष्णः शरणं मम।। 356।।
श्रीकृष्णाभिमुखा धन्या भक्ता भक्त्या समाश्रिताः।
धिक्कृता विमुखाः कृष्णे श्रीकृष्णः शरणं मम।। 357।।
कृष्णः स्तोता स्तुतिः कृष्णः कृष्णः स्तोत्रं सुमङ्गलम्।
नित्यं भक्त्या स्तुतः प्रीतः श्रीकृष्णः शरणं मम।। 358।।
भक्तमानप्रदः कृष्णो मान्योऽमानी सतां प्रियः।
ब्रह्मण्यो ब्रह्मविद् ब्रह्म श्रीकृष्णः शरणं मम।। 359।।
यज्ञकृद् यज्ञभुक् कृष्णो यज्ञे कृष्णो महाहविः।
प्रीतो यज्ञैर्हि यज्ञाङ्गः श्रीकृष्णः शरणं मम।। 360।।
सर्वे कृष्णपरा वेदा मखाः कृष्णपरास्तथा।।
देवाः कृष्णाश्रिताः सर्वे श्रीकृष्णः शरणं मम।। 361।।
त्रयो लोकास्त्रयो योगाः परं ज्ञानं परा गतिः।
विद्याः कृष्णपराः प्रोक्ताः श्रीकृष्णः शरणं मम।। 362।।
चराचरस्य लोकस्य कृष्णः पूज्यो गुरुः पिता।
कृष्णाधिकः कुतश्चान्यः श्रीकृष्णः शरणं मम।। 363।।
कृष्णश्चक्री गदी खड्गी पाञ्चजन्यधरो हरिः।
अप्रमेयद्युतिः कृष्णः श्रीकृष्णः शरणं मम।। 364।।
आदित्या वसवो रुद्रा यक्षगन्धर्वकिन्नराः।
विश्वरूपे स्थिताः सर्वे श्रीकृष्णः शरणं मम।। 365।।
रक्षोभूतपिशाचानां भीत्या विद्रावको हरिः।
नामसंकीर्तनेनैव श्रीकृष्णः शरणं मम।। 366।।
कृष्णो विश्वेश्वरो विश्वरूपोऽनन्तविभूतिमान्।
आदिमध्यान्तरहितः श्रीकृष्णः शरणं मम।। 367।।
महायोगेश्वरं कृष्णमनन्तं विश्वतोमुखम्।
दृष्ट्वा पार्थोऽब्रवीद् वाक्यं श्रीकृष्णः शरणं मम।। 368।।
सततं कीर्तनैर्भक्ताः प्रणामैश्च मुहर्मुहुः।
नित्ययुक्ता ब्रुवन्त्येवं श्रीकृष्णः शरणं मम।। 369।।
जितात्मा सुप्रसन्नात्मा समः शान्तः समाहितः।
योगारूढो जपेन्मन्त्रं श्रीकृष्णः शरणं मम।। 370।।
एकान्ती निस्पृहो भक्तो योगयुक्तः स्थिरासनः।
जपेदष्टाक्षरं मन्त्रं श्रीकृष्णः शरणं मम।। 371।।
यज्ञो दानं हरेरर्चा हरेर्नामानुकीर्तनम्।
सतां सङ्गः परो यज्ञः श्रीकृष्णः शरणं मम।। 372।।
स्तूयते गीयते कृष्णो वेदैर्यज्ञैश्च ब्राह्मणैः।
ॐ तत्सदिति मन्त्रार्थः श्रीकृष्णः शरणं मम।। 373।।
सुप्रसन्नः सुखासीनः स्थितप्रज्ञो जितेन्द्रियः।
प्रत्यहं प्रजपेन्मन्त्रं श्रीकृष्णः शरणं मम।। 374।।
अजश्चैकः स्वयंज्योतिः स्वयम्भूश्च भवोद्भवः।
कर्ता भर्ता च संहर्ता श्रीकृष्णः शरणं मम।। 375।।
हे कृष्ण ! हेऽच्युतानन्त ! गोविन्द ! त्राहि मां प्रभो।
कीर्तनं रोगनाशाय श्रीकृष्णः शरणं मम।। 376।।
अगुणः सगुणोऽनामी नामरूपैः सुरूपितः।
नामरूपगुणैः सेव्यः श्रीकृष्णः शरणं मम।। 377।।
रूपातीतो गुणातीतो नामातीतो निरूपितः।
नामरूपरसोपास्यः श्रीकृष्णः शरणं मम।। 378।।
अहो ! कृष्णः परं ब्रह्म मित्रं नन्दव्रजौकसाम्।
सर्वेषां देहिनामात्मा श्रीकृष्णः शरणं मम।। 379।।
पूर्णबोधः प्रशान्तात्मा परमात्मा सनातनः।
परावरात्मा भूतात्मा श्रीकृष्णः शरणं मम।। 380।।

''श्रीकृष्णमन्त्रमहास्तोत्रे दशमो विरामः''

।। श्रीकृष्णः शरणं मम।।

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )
Mob.: 9351226660

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्णचन्द्र शरणं प्रपद्ये )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

ज्ञानामृतं भक्तिरसामृतञ्च नासामृतं कृष्णकथामृतं तत्।
सतां प्रसंगात्परिपातुकामः श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 1।।
यत्पादपद्मातिसुदीर्घपोतं तर्तुं भवाम्भोधिमनन्यभक्त्या।
तं द्वारकेशं मथुरापुरीशं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 2।।
गीतामृतं ज्ञानमयं प्रपातुं मृधे स्वधर्माश्रयभक्तियोगम्।
जगद्गुरुं पार्थरथाधिरूढं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 3।।
गोविन्द! गोपाल! मुकुन्द! कृष्ण! हरे! मुरारे! जगदीश ! विष्णो!।
नामानि गायन्मधुराणि भक्त्या श्रीकृष्णचन्द्रं शरणं प्रपद्ये।।4।।
आविष्टचेताश्चरणारविन्दे हरेः कथानामगुणानुरक्त्या।
तद् धाम दिव्यं परमं प्रयातुं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 5।।
विष्णुं विभुं ब्रह्मपरं वरेण्यं सत्तात्मकं निर्विषयं निरीहम्।
अव्यक्तमाद्यं खलु निर्विकारं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 6।।
लोकाधिपत्यं न रसाधिपत्यं न कामये स्वर्गसुखोपभोगम्।
भवाब्धिपारं प्रतियातुकामः श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 7।।
श्रीनन्दसूनोर्वृषभानुजायाः संयुक्तरूपं रसभावमूर्तिम्।
प्रेमाम्बुधिं गौरहरिं वदान्यं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 8।।
गोपाङ्गनागोपसखं ब्रजेशं गोवत्सवृन्दैः परिसेव्यमानम्।
त्रिभङ्गरम्यं मुरलीं क्वणन्तं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 9।।
वेदान्तवेद्यं पुरुषं पुराणं विश्वेश्वरञ्चाखिलविश्ववन्द्यम्।
अद्वैतमाद्यं तमचिन्त्यरूपं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 10।।
नामामृतास्वादनवत्परैर्हि प्रेमार्द्रचित्तैर्हृदि भावगम्यम्।
गोविप्रसाधुसुरवृन्दसेव्यं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 11।।
बर्हावतंसं नवनीतहस्तं गोपालबालं स्मितसुन्दरास्यम्।
कण्ठे लसन्मौक्तिकरत्नमालं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 12।।
अनन्तवीर्यं श्रुतिगीतवीर्यं हिरण्यवीर्यं श्रवणीयवीर्यम्।
सर्वावतारेषु निगूढवीर्यं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 13।।
कालिन्दिकूले परिधावमानं श्यामं किशोरं नयनाभिरामम्।
स्मितानन नीलमणिं मनोज्ञं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 14।।
दिव्यं हरेर्जन्म च कर्म दिव्यं दिव्या च लीला पुरुषोत्तमस्य।
ज्ञातुं प्रवेष्टुं त्विह भक्तिरीत्या श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 15।।
श्रीमज्जगन्नाथमनाथनाथं ब्रह्मण्यदेवं परमात्मतत्त्वम्।
देवाधिदेवं वसुदेवसूनुं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 16।।
सद्भिर्महद्भिश्च विरक्तिमद्भिर्भक्तिप्रियैर्भागवतैः सुसेव्यम्।
प्रपन्नभक्तार्तिहरं दयालुं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 17।।
राधाप्रधानां रसभावरूपां निकुञ्जलीलां रसिकैरुपास्याम्।
रागानुगाभक्तिमवासुमेव श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 18।।
गोविन्दपादाब्जरतिर्हृदब्जे प्रीतिः परा स्याद्रसभावयुक्ता।
सत्कर्म सद्धर्मगुणानुरक्त्यै श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 19।।
प्राणेश्वरं कृष्णमनुस्मरन्त्यो वृन्दावनीयाः ब्रजमण्डलीयाः।
गायन्ति गोप्यो विरहातुरास्ताः श्रीकृष्णचन्द्रं शरणं प्रपद्ये।।20।।
गोपाङ्गनानां नवनीतचोरं योगीश्वराणामपि चित्तचोरम्।
प्रपन्नभक्ताखिलपापचोरं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 21।।

''श्रीकृष्णः शरणं मम''

।। श्रीकृष्णार्पणमस्तु।।

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )
Mob.: 9351226660

संस्कृतसमाचाराः

## ज्योतिष-कर्मकाण्ड-प्रशिक्षण शिविरार्थिसम्मानसमारोहस्यायोजनम्

विश्वगुरुदीप आश्रम शोधसंस्थान, जयपुर द्वारा जनवरी-मासे एकादश दिनांकात् आरभ्य पञ्चविंशतितमं दिनाङ्कं यावत् सञ्चालितस्य ज्योतिष-वास्तु-प्रशिक्षण-शिविरस्य, षडविंशतितमाद् दिनाङ्कादारभ्य फरवरीमास्य नवमं दिनाङ्कं यावत् सञ्चालितस्य कर्मकाण्ड पौरोहित्य प्रशिक्षण शिविरस्य च शिविरार्थिनां सम्मानसमारोहः शोधसंस्थानस्य प्राङ्गणे मार्चमासस्य तृतीये दिनाङ्के समायोजितोऽभवत्। समारोहे महामण्डलेश्वर स्वामी ज्ञानेश्वरपुरी महोदया अध्यक्षा आसन्। देवर्षि कलानाथ शास्त्रिणो मुख्यातिथियः आसन्। समारोहस्य सञ्चालनं डॉ. सुरेन्द्रकुमारशर्मभिः विहितम्। समारोहे एकविंशतिसंख्याकेभ्यः शिविरार्थिभ्यः ससम्मानं प्रशिक्षण-प्रमाणपत्राणि वितीर्णानि। शिविरसंयोजकाः डॉ. रामदेव साहू महोदयाः, डॉ. योगेश कुमारः (शोध संस्थान निदेशकाः), पण्डित अनन्तशर्माणः, डॉ. कुलदीपपालावत महोदयाः (जगद्गुरुरामानन्दाचार्य राज. संस्कृत विश्व-विद्यालयीय शिक्षासंकाय प्राध्यापकाः) श्रीमन्तः सोहनलाल-यादवमहोदयाअन्येऽप्यनेके विद्वांसः समुपस्थिता आसन्। समारोहस्य सम्पन्नतायां संस्थान निदेशकः डॉ. योगेश कुमारः आगन्तुकानां विदुषां शिविरार्थिनां च धन्यवादं ज्ञापितवान्।

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# दण्डकसङ्कलनम्

प्रौढसंस्कृतकाव्यपरम्परायां ''दण्डक'' रचनानां प्रमुखं स्थानमासीत् प्राचीने काले, मध्यकालेऽपि। पद्यबद्धानि न भूत्वाऽपि लयबद्धे गद्ये सप्रवाहशिल्पे निबद्धानि दण्डकानि काव्यसर्जनोत्थेनाऽऽनन्देन पाठकान् सुभृशं तर्पयन्ति स्म। दक्षिणभारते दण्डकरचना लोकप्रिया अभूवन्निति विदन्त्येव विद्वांसः। राष्ट्रपतिसम्मानितः कविकुलाग्रणीः, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. अभिराज राजेन्द्रमिश्रः सर्वविधानां काव्यशिल्पानां विशेषज्ञोऽस्ति, तथ्यस्यास्य स्थापनमनया घटनया स्पष्टीभवति यद्यथा तेन विरचितं महाकाव्यं (जानकीजीवनं), मुक्तकरचनाः, नुक्कडनाटकादीनि, यक्षगानानि, कथाः, निबन्धाश्च प्रकाशमाप्ताः, तथैव तद्विरचितानां 15 दण्डकानां सङ्कलनमपि देहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन प्रकाशितम्। ''अभिराजदण्डकम्'' शीर्षकं वहन्नयं दण्डकसंग्रहः कवेः शिखरप्रतिभां स्फोरयति।

कस्मिंश्चन दण्डके समस्तलघ्वक्षरघटितं गद्यं लयबद्धं दृश्यते, कुत्रचन लयबद्धं, रगणबद्धं हृदयहारि गद्यमवलोक्यते किन्तु छन्दोबन्धस्येवाऽऽनन्दं प्रयच्छति। मन्ये तदिदमेवावलक्ष्य प्रधानसम्पादकेन विद्वत्प्रवरेण राष्ट्रियसंस्कृतसंस्थान कुलपतिना प्रो. परमेश्वरनारायण-शास्त्रिणा शीर्षकेणास्य सह विवरणमेवं वर्णितमस्ति उपशीर्षक ''एककविकृतदण्डकच्छन्दसां बृहत्तमं सङ्कलनम्'' येन प्रतीयते यद् दण्डकमपि किञ्चन छन्दः।

दण्डकसंग्रहेऽस्मिन् ''देवदण्डक'' शीर्षकवहे प्रथमे खण्डे देवस्तुतिपराणि यानि सप्त दण्डकानि संग्रहीतानि तानि सर्वाणि लघ्वक्षरघटितानि, शारदादण्ड-कम्, पराम्बादण्डकम् इत्यारभ्य भागीरथीदण्डक-पर्यन्तम्। एवंविधानां दण्डकानां छटा सुतरां हृदयहारिणी भवेदेवेति सारल्येनानुमातुं शक्यते। द्वितीये खण्डे ''प्रकीर्ण दण्डकम्'' इति शीर्षकवहे भारतदण्डकम्, सुरभारती-दण्डकम्, कलिदण्डकम् इत्यादीनि अष्ट-दण्डकानि लघ्वक्षरबद्धानि न सन्ति किन्तु सुतरां लयबद्धानि, मनोहारीणि च विद्यन्ते। कुत्रचन सगणस्य शोभा, कुत्रचन रगणस्य शोभा हृदयमावर्जयति पाठकानाम्।

प्रतिपृष्ठं मूलदण्डकानां हिन्द्यनुवादोऽपि मुद्रितोऽस्ति अधोरेखया विभज्य मूलेन सह, येन छात्रा अन्ये जिज्ञासवश्च प्रतिपङ्क्ति दण्डकानामर्थावगमनं कर्तुं शक्नुयुः। हिन्द्यनुवादोऽयं स्वयं कविवर्येण मिश्रेण प्रणीतः स्यादिति प्रतीयते यद्यपि तादृश उल्लेखो ग्रन्थस्य भूमिकासु नाऽवलोकितः स्पष्टं, न वा मुखपृष्ठेष्वन्यत्र वा तादृशी सूचनाऽस्ति। अस्मिन् हि दण्डकबद्धैव भूमिकाऽस्ति सुविदितस्य विद्वद्वर्यस्य प्रो. राधावल्लभत्रिपाठिनो राष्ट्रिय-संस्कृतसंस्थान कुलपतिचरस्य, प्रधान सम्पादकस्य प्रो. शास्त्रिणोऽपि संस्कृते ''प्राग्भणिति'' रस्ति। ग्रन्थे कुत्रचनाऽपि स्वयं प्रणेतुरभिराज राजेन्द्रमिश्रस्य जीवनवृत्तं संक्षिप्तः परिचयः अथवा चित्रं न दृश्यते मुद्रितम्। यद्यपि सुप्रथितः संस्कृतजगति प्रो. अभिराज-राजेन्द्रमिश्रस्तथापि सामान्यतो लेखकपरिचयो ग्रन्थावरणपृष्ठादिषु मुद्र्यते अतः प्रसङ्गवशादिदमु-ल्लिखितमस्माभिः। ग्रन्थस्य प्रकाशनोपलक्ष्ये सुतरां वर्धाप्यन्ते कविवर्या राजेन्द्रमिश्राः सम्पादकाश्च शास्त्रिवर्याः।

**अभिराजदण्डकम् कविः मिश्रोऽभिराज राजेन्द्रः, प्रका. राष्ट्रिय संस्कृत संस्थानम्, 56 - 57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली, पृ.सं. 140, मू. 130/-.**

## वर्धते संस्कृतपत्रकारता

संस्कृतपत्रकारता निरन्तरं प्रवर्धते, न केवलं देशेऽस्मिन्नपि तु समस्तेऽपि विश्वे सुतरामाद्रियते, सर्वथा व्यापकानायामान् धारयतीति सुमहान् प्रमोदः। भारते संस्कृतपत्रकारताया इतिहासः सार्धशतीमतिक्रम्य निरन्तरं विस्तारमभिदर्शयतीत्यपि गौरवास्पदम्। 1866 ई. तः प्रारब्धा संस्कृतपत्रकारतेति साहित्येतिहासकाराणां सुविदितैव स्थापना। साम्प्रतं तु संस्कृतपत्रकारता समस्तेऽपि जनसञ्चारमाध्यमपटले प्रतिष्ठिताऽस्तीत्यपि सुस्पष्टमेव। मुद्रितपत्रगता (प्रिन्ट मीडिया) पत्रकारता तु सुदीर्घमितिहासं बिभर्त्येव, आकाशवाणी-दूरदर्शन-साइबरनेटिक्स इत्यादिगताऽपि संस्कृतपत्रकारता जागर्ति। अस्यां दूरदर्शने वार्तावली दृश्यते, वेब जर्नलेति ख्यातं माध्यममप्यस्या अङ्गम्।

संस्कृतपत्रिकापरिवारे सर्वविधाः पत्रिका राजन्ते। समाचारपत्रिकाः, सर्जनात्मकसाहित्यपत्रिकाः, शोध-पत्रिका इत्यादयः सुप्रथिता संस्कृत जगति। संस्कृतविश्व-विद्यालयेभ्यः संस्कृतसंस्थानेभ्यश्चानेकाः शोधपत्रिका प्रकाश्यन्ते। सामान्यतस्तादृशीनां पत्रिकाणां गणना पत्रकारतापरिभाषान्तर्गतं न क्रियते, वैदुष्यस्य, शोधविद्यायास्तानि प्रकाशनानि किन्तु समाचार पत्रिकाः साहित्यिकपत्रिकाश्चापि संस्कृते सुदीर्घमितिहासं वहन्ति। को न जानाति यत् 1970 ई. वर्षे मैसूरतो दैनिक पत्रिकायाः सुधर्मायाः स्थापनाऽभूत् याऽद्यापि सप्रशंसं प्रकाश्यते। अर्धशताब्दी निकटस्थाऽस्याः पत्रिकायाः। स्वर्णजयन्ती समायाति। एवमेव पाक्षिकं वार्तापत्रमपि प्रकाश्यते इति ज्ञात्वा प्रमोदेरन् संस्कृतसुधियः। उत्तराञ्चलात् देहरादूनतः ''वाक्'' नाम्नी पाक्षिकी वार्तापत्रिका डॉ. बुद्धदेवशर्मणां कृपाप्रसादात् प्रकाश्यते।

संस्कृतमासपत्रिकाणां प्रभूता संख्या प्रसरति यासु कथाः, कविताः, लेखाः, वार्ताः, सचित्रप्रतिवेदनादीनि प्रकाश्यन्ते इति जानीयुरेव पाठकाः। तासां सूची कतिधा संस्कृतपत्रिकासु मुद्रिताऽपि दृश्यते। ''कथासरित्'' कथा-साहित्यस्य पत्रिका। उत्कलादिभ्योऽञ्चलेभ्यः, कर्णाटक-प्रदेशात्, भारतमध्यदेशात्, राजस्थानात्, राजधानीतः, प्रकाश्यमानानां संस्कृतपत्रिकाणां विषयवस्तु व्यापक-मस्ति। बेंगलूरूतः प्रकाश्यमानं ''सम्भाषणसन्देश'' नामकं मासिकपत्रं सुस्फीतं मनोहारि च साहित्यं प्रस्तौति। उत्कलेभ्यः ''लोकभाषासुश्रीः'' नामकं मासिकं मुखपत्रं भद्रकनगरात् प्रवर्तते। देहलीतः अर्वाचीनसंस्कृतम्, संस्कृतवाणी, संस्कृतरत्नाकर इत्यादीनि पत्राणि प्रकाश्यन्ते। पत्रकारपितामहस्य वसन्त अनन्त गाडगिलस्य पत्रकारता सेवा कस्य स्यादपरिचिता? ''शारदा पत्रिका'' पुण्यपत्तनस्य पुण्यपत्रिकाऽस्त्येव।

जयपुर नगरे 7,8,9, फरवरी दिनेषु समधिविष्टस्य राजस्थानसंस्कृतसाहित्यसम्मेलनस्य षोडशे महाधिवेशने संस्कृतपत्रकाराणां सम्मेलनमप्यायोजितमासीद् यत्र प्रमुखाः संस्कृतपत्रकाराः, सम्पादकाः सुधियश्च भूयस्यां संख्यायां समवायन्त। गाडगिलवर्याः, डॉ रमाकान्त-शुक्लवर्याः, बलदेवानन्दसागरवर्याः, सम्पादन-कुशला विदुष्यः अन्ये च सम्मेलनमिदं सफलमकार्षुः। विदुषी-वर्यया जयलक्ष्मीमहाभागया तस्मिन्नवसरे प्रथितेभ्यो विद्वद्भ्यः 2019 वर्षस्य दिनदर्शिनी (कलैण्डर), या सुधर्मापत्रिकया प्रसारिताऽभूत्, सादरं प्रत्ता, संस्कृत-दिनपत्रिकायाः सुधर्मायाः नवचत्वारिंशत्तम विशेष-सञ्चिका (49) या 2018 ई. वर्षस्य विशेषाङ्करूपेण विशेषसामग्र्या सह प्राकाश्यत तत्र प्रदत्ता यां दृष्ट्वा सर्वेऽपि सुधियः प्रसन्ना आसन्। विशेषसञ्चिकायामस्यां सुप्रतिष्ठितानां विदुषां 68 लेखाः, 4 कथाश्च प्रकाशिताः सन्ति। हृदयहारिणी सेयं विशेषसञ्चिका सुधर्माया वैशिष्ट्यमपि प्रकटयति, प्रकाशितसामग्र्या उत्कृष्टतामपि प्रमाणयति। दिनपत्रिकाया अस्याः संपत्कुमार-नागराज राव-सत्यनारायण तलकाडु-हेगड़े प्रभृतयः सम्पादकाः 561, 2-रामचन्द्र अग्रहार, मैसूरुतः प्रकाशनं कुर्वन्ति।

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

## परीक्षणं नियुक्तिश्च

नागपुरस्य समीपे सिन्दीग्रामे 1939 ई. वर्षे ड्राक्टर-महोदयैः सह संघस्य प्रमुखाः सहयोगिनः कार्यकर्त्ता-रश्चोपविश्य संघकार्यपद्धतेः रूपेरखायाः, कार्यप्रगतेः, आदेशवाक्यानां, प्रार्थनादिविषये च सततमष्टदिवस-पर्य्यन्तं स्पष्टां चर्चां विचारविमर्शं च कुर्वन्त आसन्। एकैकविषयस्य चर्चायां पूर्णायां ड्राक्टरमहोदयाः यं निर्णयं कथयन्तिस्म तं सर्वे स्वीकुर्वन्तिस्म। श्री गुरुमहाभागा अपि स्वबुद्धिमत्तायाः तर्काणां च बलमाश्रित्य प्रतिविषये स्वाभिमतस्य पूर्णं मण्डनं कुर्वन्तिस्म परमन्ते ड्राक्टरमहोदयाः यदि तत्प्रतिकूलं निर्णयं कुर्वन्तिस्म तमपि गुरवो मनःपूर्वकं स्वीकुर्वन्तिस्म। अनेन गुरुमहाभागानां मनः-संयमः, ड्राक्टरमहोदयानां कृते सर्वात्मना समर्पणभावना सर्वेषां चेतसि समागता। सर्वे अचिन्तयन् ड्राक्टरमहोदयानामुत्तराधिकाराय गुरव एव समर्थाः। 1939 ई. वर्षे गुरवः संघस्य सरकार्यवाहपदे नियुक्ताः।

तेष्वेव दिवसेषु नासिकनगरसमीपे देवलालीग्रामे ड्राक्टरमहोदयाः ज्वरग्रस्ता अभवन्, ज्वरोऽयं प्रतिदिनं वर्द्धमान एवासीत्। तेषां चिकित्सायां संलग्नाः ड्राक्टरा अपि हताशाः अभवन्। एतादृश्यां विकटपरिस्थितावपि गुरवस्तेषां सेवायां संलग्ना आसन्। सेवाकाले गुरवः समग्ररात्रौ जागरणं कृत्वापि ड्राक्टरमहोदयानां लघु बृहदावश्यकतासु औषधादिकार्येषु च व्यस्ता आसन्। कतिपयदिवसानन्तरं सुदैवात् तेभ्यः स्वास्थ्यलाभः समभवत्। देवलालीग्रामात्परावृत्यागते कपियमासेष्वेव पुनर्ड्राक्टरमहोदयाः अस्वस्थाः सन्तो नागपुरे सम्प्राप्ताः। 1940 ई. वर्षे नागपुरे तृतीयवर्षीये शिक्षणशिविरेऽपि ते केवलं दशमुहूर्तं यावदेव वक्तुमशक्नुवन्। तेषां ते शब्दाः स्वयंसेवकेभ्यश्चिरं प्रेरकाः भविष्यन्ति। ''अद्याहं स्वसम्मुखे हिन्दुराष्ट्रस्यैकां लध्वीं प्रतिमां पश्यामि। मया केवलमिदमेव कथ्यते यद् भवन्तः संघकार्यमेव जीवनस्य प्रमुखकार्यं स्वीकुर्वन्तु, अस्माकं जीवने एतत्कथनस्य दुर्भाग्यक्षणं नागच्छेत् कस्मिंश्चित्समयेऽहं स्वयंसेवक आसम्।''

ड्राक्टरमहोदयानां ज्वरः सततं वर्द्धमान एवासीत् चिकित्सकैरपि हताशैः संभूय तेषां ''लम्बरपंक्चर'' नाम्नीं क्रियां कर्तुं निर्णीतम्। इदं श्रुत्वैव ड्राक्टरमहोदयैः स्वान्तसमयं विज्ञाय उपस्थितानां कार्यकर्तॄणां संमुखे गुरुमहाभागमाहूय कथितम्- ''अधुना भवानेव संघ-कार्यदायित्वं स्वीकरोतु।'' लम्बरपंक्चर क्रियानन्तरमेव 21.6.1940 दिने ड्राक्टरमहोदयाः स्वजर्जरशरीरं त्यक्त्वा अनन्ते विलीना अभवन्।

### संघस्य प्रधाननायकत्वम्

श्रीमन्तो गुरवः संघस्थान्यकार्यकर्तॄणां तुलनायां नवीनाः आसन्। देशे तु तेषामधिकः परिचयोऽपि नासीत्। श्रीगुरूणां नेतृत्वे संघस्य भविष्यं कीदृशं भविष्यति इति चिन्ता कतिपयहितचिन्तकानां मनसि स्वाभाविक्ये-वासीत्। कतिपयजनाः विविधाः समालोचनाः कुर्वन्तः परामर्शदानमप्यकुर्वन्। परं गुरुमहाभागैः स्वीये प्रथमे प्रवचने यादृशाः विचाराः व्यक्तीकृतास्तेन समालोचकानां

मुखावरोधः संजातः। द्राक्तरमहोदयेषु मातृवद्वात्स-ल्यम्, पितृ तुल्यमुत्तरदायित्वं गुरुतुल्यं च मार्गदर्शनं त्रयाणामपि समन्वय आसीत्। तैः संघकार्यस्य कठिनं दायित्वं मह्यं प्रदत्तम्, परमिदं तु विक्रमादित्यसिंहासनमस्ति, अस्मिन्नारूढ अजापालकोऽपि समुचितं न्यायं करिष्यति। अस्माकं महानायकस्य पुण्यप्रतापेन मे हस्ताभ्यामप्यु-चितमेव कार्यं भविष्यति। अपरस्मिन्नेकस्मिन् भाषणे तैः कथितम्- ''अस्माकं संगठनमभेद्यं दुर्गमस्ति। अस्मिन् प्रहारकर्त्तृणां चंचव एव त्रुटिष्यन्ति।'' एतादृशैर्गुरु-महाभागानामात्मविश्वासपूरितैर्वचनैः स्वयंसेवकानां साहससंवर्द्धनं संजातम्, सहैव विविधसमालोचकानां ध्वनिरपि शान्तोऽभूत्।

एवं गुरुमहाभागैः संघकार्यमेवैकमात्रं स्वजीवनस्य प्रमुखं कार्यं स्वीकृतम्। अतएवैका महत्वपूर्णा वार्त्ता- तैः स्वदिनचर्यायां, जीवनपद्धतौ स्वभावादिकेषु च संघकार्यानुरूपं परिवर्त्तनमानेतुं यथाशक्ति प्रयतितम्। स्वदोषेषु न्यूनतां कर्त्तुं शनैः शनैरायासः प्रवर्तितः। तेषां वाचि अनुशासनकारणाद्या कठोरता उग्रता च भासतेस्म सापि शनैः शनैः न्यूना संजाता। तदर्थं ते स्वयमेव सततं चिन्तयन्तिस्म। सैद्धान्तिकरूपेण गुरुमहाभागाः हिन्दु-राष्ट्रीयतां पूर्वरूपेणात्मसात् चक्रुः। एतादृशेषु विषयेषु तेषां संमुखे द्राक्तरमहाभागानां ज्वलन्तमुदाहरणमासीत्।

क्रमशः ...

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **चतुः सप्ततितमः प्रसङ्गः**

# घण्टावादको दानदाता

❑ **श्रीमती आराधना धर्माधिकारी**

आसीत् कर्णावत्यां (अहमदाबाद नगरे) एकं विशालं विष्णुमन्दिरम्। तस्मिन् बहवः कर्मचारिणो विविधकार्येषु नियोजिता आसन्। आरार्तिक्यसमये एको घण्टावादको नियुक्त असीत्। स महत्या तल्लीनतया मनोहरं घण्टावादनं करोतिस्म। तेन श्रोतृष्वपि महतीश्रद्धा समुत्पन्ना भवतिस्म। अथ कालान्तरेण मन्दिरस्य प्रबन्धसमितिः परिवर्तिता। नूतनेन समित्यध्यक्षेण (महान्तेन) आदेश एकः प्रसारितः ये निरक्षरास्ते मन्दिरे कर्मचारिणो नैव भविष्यन्ति। तेन निरक्षरत्वात्स सेवातो निस्सारितः। परं श्रोतृषु तद्रुचिकरं नैव भासतेस्म। तैः कथितम् त्वं मन्दिरे घण्टावादनं कुरु, तुभ्यमेकमापणं निःशुल्कं दद्मः। तेन व्यापारमपि कुरु। तेनैतत्स्वीकृतम् प्रबन्धसमित्यापि स्वीकृतिः प्रदत्ता। अनन्तरमीशकृपया तस्य व्यापारः प्रवृद्धः। सः एकैकं कृत्वा सप्तापणानां स्वामी समभवत्। अन्ते च स एकस्योत्पादनालयस्य (फैक्ट्री का) स्वाम्यभवत्।

अथ तस्य समीपे केचन अनाथालयस्य कार्यकर्त्तारः समागताः। तैः कथितम् तव पितृचरणैरस्मभ्यं सहायतार्थं लक्षमुद्राः प्रदातुमाश्वासनं प्रदत्तमासीत्। त्वमधुना तत्पूर्तिं कुरु। तेन कथितम् अवश्यमहं तत्पूर्तिं करिष्ये। तेनैकं चेकपत्रं तेषां संमुखे प्रक्षिप्तम्, परमत्र हस्ताक्षराणि तु नैव सन्ति। हस्ताक्षराणि त्वहं जानाम्येव न, आनीयतामङ्गुष्ठ-मुद्रां करोमि। श्रुत्वैव सर्वे विस्मिताः। पुत्राय तेन कथितं यदि न दत्तं स्यात्कथं पितुरुत्तराधिकारी स्याम्।

आस्थायामध्ययनादेर्नास्त्यावश्यकता।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

बालोपयोगिनी लघुकथा

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

## विदुरः

विदुरः धर्मदेवस्यावतार आसीत्। धर्मशास्त्रेषु राजनीत्याञ्च स आसीत् परमो निपुणः। निस्पृहो विदुरः क्रोधेन सर्वथा असम्पृक्तः। अत एव जगति सर्वत्र महान्तः जनास्तु 'महात्मा' इति नाम्ना उद्घोषयन्ति स्म। विद्वज्जनैः सम्पूजितस्य तस्य सुयशः सम्पूर्णे भूमण्डले व्याप्तमासीत्। भीष्मेण युवावस्थायामेव विदुरस्य विवेकं शास्त्रज्ञानं राजनीत्यामपि च निपुणत्वं सम्यक् विलोक्य स महाराजधृतराष्ट्रस्य प्रधानमन्त्रिपदे नियुक्तः कृतः।

दुष्टेन दुर्योधनेन यदा पाण्डवानां विनाशार्थं लाक्षागृहनिर्माणस्य षड्यन्त्रं कृतं तदा विदुरेणैवास्य सूचना पाण्डवेभ्यः प्रदत्ता आसीत्। तेनैव कारणेन ते तस्मिन् लाक्षागृहे दग्धा न बभूवुः।

त्रिषु लोकेषु महात्मविदुरसदृशो धर्मनिष्ठो नीतिनिपुणश्च इतरो जनो नासीत्। यदा धृतराष्ट्रेण दुर्योधनाय द्यूतक्रीडाया अनुमतिर्दत्ता तदा विदुरेण आग्रहपूर्वकं स निवेदितः ''राजन् अहं भवत एव-द्यूतक्रीडायाः कृते अनुमतिप्रदानकार्यम् उचितं न मन्ये। अनेन द्यूतक्रीडायाः निकृष्टकार्येण भवतां इमे सर्वे सुताः वैरभावयुताः भविष्यन्ति। अतः इदं द्यूतक्रीडनं निरोद्धव्यं युष्माभिः। अनेन सत्परामर्शेण प्रभावितेन धृतराष्ट्रेण दुर्योधनमाहूय अयं सत्परामर्शः दत्तः-'गांधारीसुत ! इदं द्यूतम् अस्माकं प्रधानामात्यो विदुरः नृपतिजनोचितं न मन्यते। अतः अयं कुविचारः त्याज्यः। विदुरः अस्माकं हितचिन्तकः। अतः तस्य सत्परामर्शः अस्माभिः पालनीयः। तेनैव अस्माकं हितं कल्याणं च भविष्यति। तेन विदुरेण त्रिकालज्ञस्य बृहस्पतेः रचितानां शास्त्राणाम् अध्ययनं कृतम्।' यद्यपि स वयसि कनिष्ठः किन्तु ज्ञाने तु सः ज्येष्ठः अस्माकं कुलस्य च प्रधानामात्यश्चाप्यस्ति। अतः तस्य संकेतानुसारेण द्यूतक्रीडायाः कुविचारः त्याज्यः। विदुरेणोक्तम् यदनेन द्यूतेन पारस्परिको विरोधो महत्तरो भविष्यति; तच्च राज्यविनाशस्य कारणमपि च भविता। अनेन मिथः वार्तालापेन दुर्योधनः संतुष्टो नाऽभूत्। वृद्धो धृतराष्ट्रः दुर्योधनस्योपरि विशेषानुरक्त आसीत् अतः सः दुर्योधनस्य दुराग्रहेण युधिष्ठिरं प्रति द्यूतक्रीडाया निमन्त्रणं प्रेषितवान्।

धृतराष्ट्रमनुकूलं कर्तुमशक्तः विदुरः युधिष्ठिरं प्रति जगाम। तमपि च द्यूतक्रीडायाः अनिष्टकरान् परिणामान् बोधयित्वा द्यूतान्निवर्तनायितुं बहुप्रयत्नं चकार। किन्तु युधिष्ठिरेण सर्वाण्यप्युपदेशवाक्यानि धैर्येण श्रुत्वा इदमेवोक्तम्, हे पितृव्य ! इमान् सर्वानेवोपदेशानहं मन्ये। किन्तु यदा कुलज्येष्ठः पितृव्यः धृतराष्ट्रः अस्मान् आह्वयति तदा कथं वयं न गमिष्यामः। युद्धे द्यूते च आहूतः क्षत्रियः यदि सम्मुखे न गच्छति तदा इदं क्षात्रधर्मविपरीतमस्ति।

इदं प्रत्युत्तरं विदुरं प्रदाय युधिष्ठिरः स्वकुलमर्यादारक्षणाय द्यूतार्थं गतवान्।

राजसभायां सभ्यानां सम्मुखे द्यूतक्रीडायां पराजितानां पाण्डवानां समक्षं च द्रौपद्याश्चीरहरणस्य अपमानं विलोक्य रुष्टः विदुरो राजभवनात् बहिर्गतोऽभूत्। पाण्डवाः यदा त्रयोदशवर्षपर्यन्तं

**वनवासदु:खं सहमाना आसन् तदा माता कुन्ती विदुरस्यैव गृहे निवसति स्म।**

## विदुर

विदुर धर्मदेव के अवतार थे। धर्मशास्त्र में राजनीति में वे परम निपुण थे। निस्पृह विदुर क्रोध से सर्वथा अछूते थे इसलिये संसार में सब जगह बड़े लोग उनको महात्मा इस नाम से सम्बोधित करते थे। विद्वानों द्वारा सम्पूजित उनका सुयश सम्पूर्ण भूमण्डल में व्याप्त था। भीष्म ने युवावस्था में ही विदुर को उसके विवेक को, शास्त्रज्ञान को और राजनीति में निपुणता को ठीक प्रकार से देखकर उन्हें महाराज धृतराष्ट्र के प्रधानमंत्री के पद पर नियुक्त कर दिया था।

दुष्ट दुर्योधन ने जब पाण्डवों के विनाश के लिये लाख के घर का निर्माण करने का षड़यन्त्र किया तो विदुर ने ही इसकी सूचना पाण्डवों को दी थी। उसी कारण से वे उस लाख के घर में नहीं जल पाए।

तीनों लोकों में महात्मा विदुर के समान धर्मनिष्ठ और नीति निपुण दूसरा व्यक्ति नहीं था। जब धृतराष्ट्र ने दुर्योधन को द्यूत (जुआ) खेलने की अनुमति दी तब विदुर ने आग्रह पूर्वक उन्हें कहा ''राजन् मैं आपके इस द्यूतक्रीडा के लिय अनुमति प्रदान करने के कार्य को उचित नहीं मानता। इस द्यूतक्रीडा के निकृष्ट कार्य से आपके ये सारे पुत्र वैरभाव से युक्त हो जायेंगे। अत: इस द्यूतक्रीडा का आपको निषेध करना चाहिये। इस सत्परामर्श से प्रभावित धृतराष्ट्र ने दुर्योधन को बुलाकर यह सत्य परामर्श दिया। हे गांधारीसुत ! इस द्यूत को हमारे प्रधानमंत्री विदुर राजा लोगों के लिये उचित नहीं मानते। अत: यह कुविचार छोड़ देना चाहिये। विदुर हमारे हितचिन्तिक हैं अत: उनका परामर्श हमें मानना चाहिये। उसी में हमारा हित और कल्याण होगा। उस विदुर ने त्रिकालज्ञ बृहस्पति द्वारा रचित शास्त्रों का अध्ययन किया है। यद्यपि वह आयु में छोटा है किन्तु ज्ञान में तो वह बड़ा है और हमारे कुलका वह प्रधानमन्त्री भी है। अत: उसके संकेत के अनुसार द्यूतक्रीडा का कुविचार छोड़ देना चाहिये। विदुर ने कहा है कि इस द्यूतक्रीडा से पारस्परिक विरोध अधिक बढेगा और वह राज्य विनाश का कारण होगा। इस आपस के वार्तालाप से दुर्योधन संतुष्ट नहीं हुआ। वृद्ध धृतराष्ट्र दुर्योधन पर विशेष अनुरक्त था इसलिये वह दुर्योधन की द्यूतक्रीडा का आग्रह शान्त करने में समर्थ नहीं हुआ। अत: दुर्योधन के दुराग्रह से धृतराष्ट्र ने युधिष्ठिर के लिये द्यूतक्रीड़ा का निमन्त्रण भेज दिया।''

धृतराष्ट्र को अनुकूल करने में असमर्थ विदुर युधिष्ठिर के पास गया उसको भी द्यूतक्रीडा के अनिष्टकर परिणाम बतलाकर द्यूत से लौटाने के लिये बहुत प्रयत्न किया। किन्तु युधिष्ठिर ने सभी उपदेश वाक्यों को धैर्य से सुनकर यही कहा 'हे चाचा ! इन सभी उपदेशों को मैं मानता हूँ।' किन्तु जब कुल ज्येष्ठ चाचा धृतराष्ट्र हमको बुलाते हैं तब कैसे हम नहीं जावे। युद्ध और द्यूत में बुलाया हुआ क्षत्रिय यदि सम्मुख नहीं जाता तो यह क्षत्रियधर्म के विपरीत है।

यह प्रत्युत्तर विदुर को देकर युधिष्ठिर अपनी कुल मर्यादा की रक्षा करने के लिये द्यूतक्रीडा के लिये गये।

राज सभा में सभ्यों के सम्मुख द्यूतक्रीडा में पराजित पाण्डवों के समक्ष द्रौपदी के चीरहरण का अपमान देखकर रुष्ट विदुर राजभवन से बाहर चले गए थे। पाण्डव जब तेरह वर्ष तक वनवास में दु:ख को सहन कर रहे थे तब माता कुन्ती विदुर के ही घर पर निवास कर रही थी।

**किशनपोल बाजार:, जयपुरम्**

नारी-स्तम्भः

# पाताले नाकपृष्ठे वा वसेयं सीतया सह

❑ डॉ. राजेश्वरी भट्ट

भारतीयसंस्कृतिसंरक्षकेण आदिकविना महर्षि-वाल्मीकिना लोकमङ्गलदृष्ट्या विरचितं आदिकाव्यं रामायणं वस्तुतः संस्कृतेर्मूलतत्त्वानां विशदं विवेचनं विद्यते। अस्मिन् प्रसंगेऽत्र वर्णितः सीतारामयोः सर्वास्ववस्थासु रम्यो दाम्पत्यभावो लोके युगयुगे-भ्योऽनुकरणीयो वरणीयश्च वर्तते। विवाहानन्तरं अयोध्यानगर्यां राजप्रासादे सुखसम्भारेषु निवसन्तौ दम्पती सीतारामौ परस्परं अन्योन्यस्य पूरकौ दृश्येते। श्रद्धाविश्वासयोर्भूमौ विहरतोः तयोः प्रीतिरनुदिनं वर्धमाना जाता। कथितञ्च -

प्रिया तु सीता रामस्य दाराः पितृकृता इति।
गुणाद्रूपगुणाच्चापि प्रीतिर्भूयोऽभिवर्धते।
तस्याश्च भर्त्ता द्विगुणं हृदये परिवर्तते।।

वा.रा. 1/77/26.27

देवाङ्गना समा रूपवती मूर्तिमती लक्ष्मीरिव श्रेयसी पतिप्राणा सीता सहचरस्य रामस्य हृदयस्थितं भावम-कथितमपि ज्ञात्वा भर्तुः मनोऽनुसारिणमाचरितवती। दम्पत्योर्मध्ये कदापि मनागपि मतान्तरं नादृश्यत। कथितञ्च -

अन्तर्गतमपि व्यक्तमाख्याति हृदयं हृदा।
तस्य भूयो विशेषेण मैथिली जनकात्मजा
देवताभिः समा रूपे सीता श्रीरिव रूपिणी

वा.रा. 1/77/28

अयोध्याया राजप्रासादे परस्परमनुकूलौ सुखेन विहरन्तौ सीतारामौ स्वधर्ममनुष्ठितवन्तौ सर्वेषां प्रीतिमवर्द्धयताम्। दिव्यरूपगुणकर्मभिः सम्पन्नौ सीतारामौ दशरथस्य भवने धन्यतरौ जातौ। गुणानां खनिं सिता प्राप्य श्रीरामः श्रिया सह विष्णुरिव सुशोभितो जातः।

कथितश्च :-

तया स राजर्षिसुतोऽभिकामया
समेयिवानुत्तमराजकन्यया।
अतीव रामः शुशुभे मुदान्वितो
विभुः श्रिया विष्णुरिवामरेश्वरः।।

वा.रा. 1/77/29

श्रद्धाविश्वासयोः हृत्सूत्रेण बद्धं सीतारामयोः दाम्पत्यजीवनं, भवतु सुखं दुःखं वा, अनुदिनं दृढ़तरं दृश्यते। विगतरात्रिपर्यन्तं राजप्रासादे भर्त्रा रामेण सह सुखशय्यामधिशयाना सीता प्रातरुत्थाय विमातुः कैकेय्या आदेशेन परिजनैः निषेध्यमानाऽपि रामेण भूयोभूयो वार्यमाणाऽपि ''अनुष्ठास्यति रामस्य सीता प्रकृतमासनय्'' इति गुरुवसिष्ठस्य भव्यं प्रस्ताव-मस्वीकुर्वन्ती पतिप्राणा दृढसंकल्पा मनागपि विचलिता न जाता घारं वनं गन्तुं उद्यता च जाता। कथितञ्च -

अहं गमिष्यामि वनं सुदुर्गमम् मृगायुतं वानरवारणैश्च
वने निवत्स्यामि यथा पितुर्गृहे तवैव पादावुपगृह्य सम्मता

वा.रा. 2/27/22

सीताया दृढाग्रहेण गृहीतो विवशोऽनन्यगतिको रामः सीतया लक्ष्मणेन च सार्धं घोरं वनं प्रस्थितो वने वनवासोचितानि महत्कष्टानि महार्हशय्याशयनो-चितायाः प्राणवल्लभायाः सीतायाः कृते असहनीयानि न भवेयुः अनया चिन्तया ग्रस्तः पतिः रामः सीतां सहजां कर्त्तुं लक्ष्मणं ब्रूते -

जागर्तव्यमतन्द्रिभ्यामद्य प्रभृति रात्रिषु।
योगक्षेमौ हि सीताया वर्तते लक्ष्मणावयोः।।

वाः रा. 2/53/3

वने यदा रावणेन सीताया अपहरणं कृतं तदा रामं प्रति सीताया दृढ़विश्वासो भारतीयनारीणां चरित्रस्य उदात्तस्वरूपं व्यनक्ति। सीताया मते इन्द्रस्य भार्यायाः शच्या अपहरणकर्त्ता कदाचिद् लोके जीवितो भवेत्। किन्तु रामस्य सहचरीं मां सीतामपहृत्य लोके कोऽपि प्राणधारणे क्षमो नाऽस्ति कथितञ्च -

अपहृत्य शचीं भार्यां शक्यमिन्द्रस्य जीवितुम्।
न हि रामस्य भार्यां मामानीय स्वस्तिमान् भवेत्।।

वा. रा. 3/48/23

यथा सीता विषमं प्राप्यापि सहचरं रामं प्रति पूर्णतः विश्वस्ताऽसीत् तथैव रामोऽपि सीतां बिना लक्ष्मणम् एकाकिनं दृष्ट्वा वने असंयत उद्विग्नश्च जातः। किमधिकं वने इतस्तः सीतां मृगयन् प्राणंस्त्यक्तुभुद्यतोऽभवत्। लताभ्यो वृक्षादिभ्यश्च सीतायाः गन्तव्यविषये प्रमत्त इव विविधान्प्रश्नानपृच्छत्। कथितञ्च -

यदि जीवति वैदेही गमिष्याम्याश्रमं पुनः।
संवृत्ता यदि वृत्ता सा प्राणांस्त्यक्ष्यामि लक्ष्मण।।

वा.रा. 3/58/9

अत्रैव प्रसङ्गे वनं नेतुं प्रार्थयन्त्याः सीताया वचनान्यप्यवधेयानि यत्रोक्तम्-

एवं वर्षसहस्त्राणि शतं वापि त्वया सह।
व्यतिक्रमं न वेत्स्यापि स्वर्गोऽपि हि न मे मतः।।

वा.रा. 2/27/20

अपि च -

स्वर्गेऽपि च विना वासो भविता यदि राघव।
त्वया विना नरव्याघ्र नाहं तदपि रोचये।।

वा.रा. 2/27/21

वाल्मीकिरामायणे वर्णितः सीतारामयोः आदर्श-दाम्पत्यसम्बन्धः युगयुगेभ्यः परिवारस्य अभ्युदयस्य निश्रेयसस्य कृते प्रेरणीयो वर्तते। अद्य पश्चिमीयेन प्रभञ्जनेन संस्कृतिमूलानि प्रकम्पितानि जातानि दम्पत्योर्मध्ये श्रद्धाविश्वासयोर्बन्धनं अनुदिनं शिथिलायते। सर्षपं पर्वताकारं कुर्वन्तौ पतिपत्नी कलहायमानौ स्वतन्त्ररूपेण जीवनयापनाय उद्यतौ दृश्येते येन वैवाहिकं जीवनं विच्छिन्नं भवति। सहैव निखिलः परिवारः छिन्न- भिन्नो भवति। सीतारामौ भारतीय युगलानां कृते आदर्शदम्पती रूपेणाऽनुकरणीयौ वर्तेते।

## हिन्दी अनुवाद

भारतीय संस्कृति के संरक्षक आदिकवि महर्षि वाल्मीकि के द्वारा लोकमंगल की दृष्टि से विरचित आदिकाव्य रामायण संस्कृत के मूल तत्वों की विशद व्याख्या है। इस प्रसंग में महाकाव्य में वर्णित 'सीताराम' का सभी अवस्थाओं में रमणीय दाम्पत्य भाव युगयुगों तक लोक में अनुकरणीय एवं वरणीय है। विवाह के पश्चात् अयोध्या के राजमहल में अनेक सुख सुविधाओं के बीच निवास करते हुए पति पत्नी राम एवं सीता परस्पर एक दूसरे के पूरक प्रतीत होते हैं। श्रद्धा एवं विश्वास की भूमि पर विहार करते हुए सीता एवं राम की प्रीति-दिनों दिन बढ़ती हुई दिखाई देती है। कहा भी गया है- पिता जनक द्वारा श्री राम को समर्पित सीता उन्हें बहुत प्रिय थी। सीता के गुणों से एवं सौन्दर्य से राम का उनके प्रति प्रेम अधिकाधिक बढ़ रहा था। इसी प्रकार सीता के हृदय में भी राम अपने गुण एवं रूप से अधिक प्रीतिपात्र बनकर स्थित थे। वा.रा. 77/26/27

देवाङ्गना के समान सुन्दरी एवं लक्ष्मी के समान मङ्गलमूर्ति प्रतिप्राणा सीता अपने सहचर राम के हृदय में स्थित भावों को बिना कहे ही जानकर उनके मनोनुकूल आचरण से श्रीराम के हृदय को आकर्षित करती थी, सीताराम के मध्य कभी भी मतमतान्तर की स्थिति नहीं उत्पन्न होती थी- वा.रा. 1/17/28

अयोध्या के राजभवन में परस्पर एक दूसरे से अनुकूल व्यवहार में प्रवृत्त सुख से अपने अपने धर्म का पालन करते हुए आदर्श दम्पती श्रीराम एवं सीता सभी को प्रिय लगते थे।

अपने दिव्य रूप गुण एवं कर्म से सम्पन्न सीता-राम को पाकर राजभवन भी धन्य था। गुणों की खान सीता सदृशी पत्नी के साथ श्रीराम लक्ष्मी के साथ विष्णु की भाँति सुशोभित थे। वा.रा. 1/77/29

श्रद्धा एवं विश्वास के दृढ़ सूत्र से बद्ध सीता एवं राम का दाम्पत्य जीवन सुख अथवा दु:ख किसी भी परिस्थिति में दिनों दिन दृढ़ता को प्राप्त हो रहा था। विगत रात्रि पर्यन्त राजभवन में अपने सहचर श्रीराम के साथ सुखशैय्या पर शयन करती हुई सीता प्रात: काल उठकर विमाता कैकेयी के आदेश से राम के द्वारा बारम्बार मना किए जाने पर भी पति राम के द्वारा दृढ़ता पूर्वक रोके जाने पर भी ''देवी सीता राम के स्थान पर राजा के पद पर अभिषिक्त होगी'' ऋषि वसिष्ठ के द्वारा प्रस्तुत इस भव्य प्रस्ताव को ठुकराती हुई प्रतिप्राणा अपने दृढ़ संकल्प से तनिक भी विचलित न होती हुई घोर वन में राम के साथ जाने के लिए उद्यत होकर कहने लगी। हे प्राणनाथ ! मैं आपके साथ मृग, वानर एवं हार्थियों से घिरे हुए वन में अवश्य चलूँगी तथा आपके चरणों की सेवा करती हुई आपके अनुकूल आचरण करती हुई वन में पिता के भवन की भाँति सुख से निवास करूंगी- वा. रा. 2/27/22

सीता के दृढ़ आग्रह से किंकर्त्तव्य मूढ़ एवं विवश राम ने सीता और लक्ष्मण के साथ वन में प्रस्थान किया। किन्तु कोमलाङ्गी एवं सुखों में पली बढ़ी सीता के लिए वन में प्राप्त होने वाले घोर कष्ट कहीं असहनीय न हों इस व्यथा से चिन्तित राम अपनी सहचरी सीता के सुख के लिए लक्ष्मण से कहते हैं - हे लक्ष्मण ! सीता को सुख निद्रा के लिए रात्रि में हम दोनों भाइयों को आलस्य छोड़कर जागना होगा क्योंकि सीता का योगक्षेम हम दोनों ही अधीन है। वा. रा. 2/53/3

वन में रावण के द्वारा अपहरण किए जाने पर सीता का अपने पति राम के प्रति दृढ़ विश्वास भारतीय नारी के उदात्त स्वरूप की भव्य झाँकी है। सीता के अनुसार इन्द्र की पत्नी शची का अपहरण करके सम्भव है कि कोई जीवित रह सके, किन्तु राम की पत्नी सीता को ले जाकर कोई भी कुशल पूर्वक नहीं रह सकता है। वा. रा. 2/48/23

जिस प्रकार पतिव्रता सीता विषम परिस्थितियों में भी अपने पति राम के प्रति पूर्ण विश्वस्त है उसी प्रकार राम भी वन में सीता के बिना अकेले लक्ष्मण को देखकर असंयत एवं उद्विग्न दिखाई देते है। यहाँ तक कि वन में इधर उधर सीता को खोजते हुए प्राण त्याग करने को उद्यत हो जाते है। उन्मत्त की भाँति अपनी सुध बुध खोकर लता वृक्षादि से सीता के गन्तव्य के विषय में विविध प्रश्न पूछते हुए लक्ष्मण से कहते है 'हे लक्ष्मण! यदि सीता जीवित होगी तभी मैं पुन: आश्रम में प्रवेश करूँगा और यदि वह मर गयी होगी तो मैं भी प्राणों का त्याग कर दूंगा। वा. रा. 3/58/9

इसी प्रसंग में वनवास में अपने साथ ले चलने की प्रार्थना करती हुई सीता के ये वचन ध्यान देने योग्य है, जहाँ सीता कह रही है- इस तरह वन में सैंकड़ो अथवा हजारों वर्षों तक भी आप के साथ रहने का सौभाग्य मिले तो मुझे कभी कष्ट का अनुभव नहीं होगा। आपके साथ के बिना तो मुझे स्वर्गलोक की प्राप्ति भी अभीष्ट नहीं है। और भी हे राघव! आपके बिना तो यदि मुझे स्वर्गलोक का निवास मिले तो भी वह मेरे लिये रुचिकर नहीं होगा। वा.रा. 2/27/20-21

इस प्रकार वाल्मीकि रामायण में वर्णित सीता और राम का आदर्श दाम्पत्य सम्बन्ध युगयुगों तक भारतीय परिवारों के लिये अभ्युदय एवं नि:श्रेयस के लिए प्रेरणीय है। आजकल पश्चिम की आँधी से भारतीय संस्कृति की जड़ें प्रकम्पित प्रतीत हो रही हैं, पति पत्नी के मध्य श्रद्धा एवं विश्वास का बंधन धीरे धीरे शिथिल होता दिखाई दे रहा है, राई को पर्वत बनाकर कलह करते हुए पति पत्नी स्वतन्त्र रूप से जीवन व्यतीत करने के लिए उद्यत हैं। जिससे वैवाहिक जीवन विच्छिन्न हो जाता है। साथ ही सम्पूर्ण परिवार भी छिन्न भिन्न एवं पराया सा हो जाता है। सीता एवं राम भारतीय युगलों के लिए आदर्श दम्पती के रूप में अनुकरणीय हैं।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# प्रतीकारमपेक्षन्ते ऋतुवैकारिकाः भावाः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**वर्षेऽस्मिन्नुत्तरे भारते हेमन्तशिशिरयोः न प्राकृतं स्वरूपमवलोकितम्। तत्र कदाचिददतिशैत्यं कदाचिच्चात्यौष्ण्यं दिवा, रात्रौ तु पुनः शैत्यम्, कदाचित्तु सहसा मेघाच्छन्नं जायते। वृष्टेरागमनमपि सहसा सञ्जायते तदनन्तरमग्रिमे दिने महच्छैत्यं, तदग्रिमे दिने तु पुनरौष्ण्यम् एवं ऋतूनामत्र वैचित्र्यं दृष्टं 2019 इत्यस्य वर्षस्य जनवरी-फरवरी-मार्चमासेषु। प्राचीनकालेऽप्येतादृशानामृतु-वैकारिकाणां भावानामाविर्भावो दृष्टस्तज्ज्ञैर्महर्षि-भिः। अत्र चरकसंहिताया एतत्सम्बन्धिनः प्रसङ्गस्यैकस्योल्लेखः समुचितः। यो ह्याचार्येण विमानस्थानस्य तृतीये जनपदोद्ध्वंसनीय-नामकेऽध्याये विश्लेषितः। आचार्य आत्रेयः शिष्यमग्नि-वेशमादिशति यद्-**

**दृश्यन्ते हि खलु सौम्य! नक्षत्रग्रहगणचन्द्रसूर्या-निलानलानां दिशां चाप्रकृतिभूतानामृतुवैकारिका भावाः, अचिरादितो भूरपि च न यथावद्रसवीर्य-विपाकप्रभावमोषधीनां प्रतिविधास्यति, तद्वियोगा-च्चातङ्कप्रायता नियता। तस्मात्प्रागुद्ध्वंसात्प्राक् च भूमेर्विरसीभावादुद्धरध्वं सौम्य! भैषज्यानि यावन्नो-पहतरसवीर्यविपाकप्रभावाणि भवन्ति। वयं चैषां रसवीर्यविपाकप्रभावानुपयोक्ष्यामहे ये चास्माननु-काङ्क्षन्ति, यांश्च वयमनुकाङ्क्षामः। (च. वि. 3/4)**

इस वर्ष उत्तर भारत में हेमन्तशिशिर में प्राकृत स्वरूप नहीं देखा गया। दिन में कभी अधिक सर्दी कभी अधिक गर्मी और रात में पुनः शीत पड़ता है, कभी तो सहसा बादल छा जाते हैं। वर्षा का आगमन भी सहसा हो जाता है। इसके बाद अगले दिन अत्यधिक शीत एवं अगले दिन तो फिर से गर्मी पड़ी, इस तरह से यहाँ सन् 2018 के दिसम्बर माह में तथा सन् 2019 के जनवरी-फरवरी-मार्च महीनों में इन ऋतुओं की विचित्रता देखी गई। प्राचीनकाल में भी तद्विषयविशेषज्ञ महर्षियों द्वारा ऐसे ऋतुवैकारिक भावों का आविर्भाव देखा गया। यहाँ चरकसंहिता के इस से सम्बन्धित एक प्रसङ्ग का उल्लेख उचित है। जिसे आचार्य द्वारा विमानस्थान के तृतीय जनपदोद्ध्वंसनीय नामक अध्याय में विश्लेषित किया गया है। आचार्य आत्रेय अपने शिष्य अग्निवेश को आदेश करते हैं कि-

हे सौम्य! अप्रकृतिभूतनक्षत्र, ग्रहसमूहचन्द्र, सूर्य, वायु, अग्नि और दिशा के ऋतुवैकारिक भाव दिखाई दे रहे हैं, इससे पृथ्वी भी शीघ्र ही ओषधियों में यथावत् रस-वीर्य-विपाक-प्रभाव को उत्पन्न नहीं कर सकेगी, इनके न रहने पर रोगों का प्रादुर्भाव निश्चित है। इसलिये हे सौम्य! जनपदोद्ध्वंसे से पहले और भूमि के विरस होने से पहले एवं औषधियों को रस-वीर्य-विपाक-प्रभाव रहित होने से पहले उखाड़ लो। जो हमें चाहते हैं तथा जिन्हें हम चाहते हैं हम इन औषधियों के रस-वीर्य-विपाक-प्रभावों का उन पर उपयोग करेंगे।

**प्रसङ्गेऽस्मिन्नाचार्येण स्पष्टरूपेण निर्दिष्टं यत् प्रकृति-आहार-देह-बल-सात्म्य-सत्त्व-वयः स्वरूपात्मका भावा भिन्न-भिन्नेषु मनुष्येषु भिन्न-भिन्नस्वरूपेण विकृता अविकृताः वा स्वं स्वं प्रभावं प्रदर्शयन्ति। तदनुरूपमेव विकृतास्ते विकारान् कुर्वन्ति। किन्तु तैर्विकारैः सर्वे मनुष्याः सामान्य-रूपेण विकृतिग्रस्ताः न भवन्ति। येषु प्रकृत्यादयः भावाः विकृताः भवन्ति तेष्वेव विशिष्टो विकारः**

**हेत्वनुरूपो भवति। किन्तु केचिद्भावाः बहिः शरीरस्थाः यदा विकृतिग्रस्ताः भवन्ति, तदा ते बहुषु मनुष्येषु समानरूपेण विकृतीः कुर्वन्ति। एते भावाः सामान्याः भावाः भवन्ति। तद्यथा- वायुः उदकं देशः काल इति। एतेषूत्तरोत्तरं दुष्परिहार्यत्वं भवति। आचार्यः कथयति यत्-**

**वाताज्जलं जलाद्देशं देशात् कालं स्वभावतः।**
**विद्याद् दुष्परिहार्यत्वाद्गरीयस्तरमर्थवित्।।**
**( च. वि. 3/10 )**

इस प्रसङ्ग में आचार्य ने स्पष्ट रूप से निर्देश दिया है कि प्रकृति-आहार-देह-बल-सात्म्य-सत्त्व-वय स्वरूपके भाव भिन्न-भिन्न मनुष्यों में भिन्न-भिन्न स्वरूप में विकृत या अविकृतरूप से अपने-अपने प्रभाव कों प्रदर्शित करते हैं। तदनुरूप ही विकृत होकर वे विकारों को उत्पन्न करते हैं। किन्तु उन विकारों से सब मनुष्य सामान्य रूप से विकृति ग्रस्त नहीं होते हैं। जिनमें प्रकृत्यादि भावविकृत होते हैं उनमें ही विशिष्ट विकार हेतु के अनुरूप होते हैं। किन्तु शरीर के बाहर स्थित कुछ भाव जब विकृति ग्रस्त होते हैं, तब वे बहुत से मनुष्यों में समान रूप से विकृति करते हैं। ये भाव सामान्य होते हैं, जैसे- वायु, जल, देश और काल। इनमें उत्तरोत्तर दुष्परिहार्यत्व होते हैं। आचार्य कहते हैं कि स्वभाव से दुष्परिहार्य होने के कारण विषयविशेषज्ञ विद्वान् वात से जल, जल से देश, देश से काल को बलवान् जाने।

**सामान्यतया विकृतो वातः निवातदेशसेवया परिह्रियते। वर्तमानकाले वायुप्रदूषणमपि व्यापकं वर्तते अतएव तदपि त्यक्तुमशक्यम्। जलस्य परिहारो न सरलो वर्तते। पुनरपि विकृतस्य जलस्य संशोधनं कृत्वा सेवनं कर्तुं शक्नुवन्ति जनाः। एवमेव दुष्टः देशोऽपि देशान्तरगमनेन त्यज्यते। किन्तु कालस्तु सर्वथा त्यक्तुमशक्यः व्यापकत्वात्। सामान्यतया फरवरी-मार्चमासयोः प्रतिवर्षमेव कालपरिवर्तनं रोगकारकं भवति। किन्तु तादृशः कालस्तु सीमितः स्वल्प एव भवति। अस्मिन्वर्षे तु पुनः पुनः ऋतुवैकारिका भावाः फरवरी-मार्चमासयोः विशेषेण विकृतिकारकाः जाताः। एते हि नक्षत्र-ग्रहगण-चन्द्र-सूर्यानिलानां दिशां चाप्रकृति-भूतानामृतुवैकारिका भावाः बहून् रोगान् समुत्पादयन्ति। विशेषेण तु कास-श्वास-प्रतिश्याय-शिरःशूल-स्वायनफ्लूज्वरेत्यादीन् रोगान् उत्पादयन्ति।**

सामान्यतया विकृत वात का निवात देश में रहने से परिहार किया जाता है। वर्तमानकाल में वायु प्रदूषण भी व्यापक है इसलिए उसका त्याग करना असम्भव है। जल का परिहार करना सरल नहीं है। फिर भी विकृतजल का संशोधन करके सेवन करना सम्भव है। इसी तरह दूषित देश का भी देशान्तर गमन से त्याग किया जा सकता है। किन्तु काल तो व्यापक होने के कारण इसका त्याग सर्वथा असम्भव है। सामान्यतया फरवरी-मार्च माह में प्रतिवर्ष ही काल परिवर्तन रोग कारक होता है। किन्तु ऐसा काल तो सीमित और अल्प ही होता है। इस वर्ष तो फरवरी-मार्च माह में ऋतु वैकारिक भाव बार-बार विशेष विकृति कारक हुये। निश्चय ही ये नक्षत्र-ग्रहगण-चन्द्र-सूर्य-वायु-दिशा आदि अप्रकृतिभूत ऋतुवैकारिक भाव बहुत से रोगों को उत्पन्न करते हैं। विशेषरूप से तो कास-श्वास-प्रतिश्याय-शिरःशूल-स्वायनफ्लू ज्वर इत्यादि रोगों को उत्पन्न करते हैं।

**विगुणेष्वपि खल्वेतेषु ऋतुवैकारिकभावेषु भेषजेनोपपाद्यमानानां जनानामभयं भवति रोगेभ्यः। अतएव रोगनिवारकाणामपवारकाणां च भेषजानां सेवनं जितात्मभिः करणीयं वर्तते। अत्र केषाञ्चि-न्नियमानां सेवनीयानाञ्च भेषजानामुल्लेखः क्रियते। यैर्हि रोगभयं न भवति। तद्यथा -**

– **अवधानतया प्रातः सायं सुसंवृत्यैव भ्रमणं अन्यच्च कर्म करणीयम्।**

– **मध्याह्नस्यातपस्य सेवनमपि त्यक्तव्यम्।**

– **प्रातःकाले नियमपूर्वकमेवोष्णोदकस्य पानं सुखावहं भवति। शौचविधिरपि सुखाम्बुनैव विधातव्यः।**

– **व्यायामोद्वर्तनमभ्यंगपूर्वकमाचरणीयम्।**

– **जातीपत्री-लवङ्गैलाफलानि प्रतिदिनमेव मुखे वारद्वयं धारणीयानि।**

– **उष्णोदकेन गण्डूषाः विधातव्याः।**

– **मुखे हरिद्रासहितस्य खर्जूरफलस्य धारणं शनैः शनैराचूषणमपि च सुखदं भवति।**

– **रात्रौ तु शयनकाले पिप्पलीद्वयं दुग्धे प्रक्षिप्य सम्यक्क्वथनं कृत्वा तयोः पिप्पल्योः भक्षणं कृत्वा तद्दुग्धमेव दशदिनपर्यन्तं पिबेत्। तेन हि ऋतु-वैकारिकैर्भावैर्जनितानां श्वासकासादीनामपवारणं भवति। यदि चेत् तैर्ग्रस्तेन जनेनापि दुग्धस्यैतस्य सेवनं चिकित्सकेन निर्दिष्टैरन्यैः सेव्यमानैः भेषजैः सह विधीयते तदा शीघ्रमेव रोगनिवारणं भवति।**

– **गोजिह्वादिक्वाथस्य कासह्रासकरक्वाथस्य च सेवनं रोगं विनापि रोगापवारणे कार्मुकं भवति।**

– **सितोपलादिचूर्णस्य मधुना सेवनं समुचितम्।**

निश्चय ही इन विगुण ऋतुवैकारिक भावों में भेषज से उपचार किये जाने वाले लोगों का रोगों से निर्भय स्वरूप होता है। अतएव रोग निवारक और अपवारक भेषज का सेवन जितात्मा व्यक्तियों द्वारा करना चाहिये। यहाँ कुछ नियमों और सेवनीय भेषज का उल्लेख किया जा रहा है, जिन के कारण निश्चय ही रोगभय नहीं होता है। जैसे–

– सावधानी से प्रातः सायं शरीर को ढककर ही भ्रमण और अन्य कर्म करने चाहिये।

– दोपहर की धूप का सेवन भी त्याग देना चाहिये।

– प्रातःकाल नियमपूर्वक गर्म जल पीना सुखदायक होता है। शौचविधि में भी सुखोष्ण जल का प्रयोग करना चाहिये।

– व्यायाम, उद्वर्तन का प्रयोग अभ्यंग के बाद करना चाहिये।

– जावित्री, लवङ्ग, इलायची के फलों को प्रतिदिन मुख में दो बार धारण करना चाहिये।

– गर्म जल से गण्डूष करने चाहिये।

– मुख में हल्दी के साथ खर्जूर के फल को धारण एवं धीरे-धीरे आचूषण करना भी सुखदायक होता है।

– रात्रि में सोने पूर्व दो पिप्पली को दूध में डालकर भली भांति उबाल कर उन पिप्पली को खाकर उस दूध को पीना चाहिये, इस तरह दूध दश दिन तक पीना चाहिये। इससे निश्चय ही ऋतु वैकारिक भावों से उत्पन्न श्वास-कास आदि का अपवारण होता है। इनसे ग्रस्त व्यक्ति के द्वारा भी इस दुग्ध का सेवन चिकित्सक के निर्देश से अन्य सेवनीय औषधियों के साथ किया जाये तो शीघ्र ही रोग निवारण होता है।

– गोजिह्वादिक्वाथ और कासह्रासकर क्वाथ का सेवन रोग के बिना भी रोग के अपवारण में कार्मुक होता है।

– सितोपलादिचूर्ण का शहद से सेवन उचित है।

### ऋतुविकारे सेवनीयाः केचिद्योगाः-

**यद्यपि ऋतुवैकारिका भावाः फरवरी-मार्चमासयोरेव प्रादुर्भवन्ति। किन्तु तेषां विकृति-कारकाणां भावानां प्रभावस्तु अप्रेलमासे निरन्तरं दृश्यते। अतएव अप्रेलमासेऽपि निम्नलिखितानां योगानां प्रयोगः करणीय एव। तद्यथा-**

– **चित्रकहरीतकी, अगस्त्यहरीतकी, च्यवनप्राशः, वासावलेहः, कण्टकार्यवलेहः, इत्यादीनां सेवनं करणीयम्।**

– **जीवक-ऋषभक-काकोली-तामलकी-द्राक्षा-ऋद्धि-जीवकैः शृतं पयः पिबेत्। अनेन कासे, श्वासे, ज्वरे, दाहे व लाभो भवति।**

**– लाजा-मुस्त-शटी-रास्ना-धात्रीफल-बिभीतकैः सुनिर्मितः क्वाथः शर्कराक्षौद्रसर्पिर्भिः संयुक्तः कासश्वासविनाशनो भवति।**

**– वासा-मुस्तक-पिप्पली-द्राक्षा-कण्टकारी-हरिद्रा-पुष्करमूल-भार्ङ्गी-इत्यादिभिः विनिर्मितः क्वाथः सेवनीयो वर्तते।**

**– खर्जूर-वासा-द्राक्षा-सिता-लाजाः समांशिकाः प्रत्येकं पञ्चग्रामपरिमिताः गृहीत्वा विधिपूर्वकं क्वाथः विधातव्यः। तदनन्तरं स्वाङ्गशीते क्वाथे दशग्रामपरिमितस्य मधुनः ग्रामार्धपरिमितस्य पिप्पलीचूर्णस्य प्रक्षेपं कृत्वा यदि पिबति श्वास-कासज्वरार्तः तदा सः शीघ्रं लभते लाभम्। यद्यप्रेलमासे दिवा तीव्रो तापः भवेत्तदापि खर्जूरादिभिर्विनिर्मितस्य क्वाथस्य सेवनं समुचितं किन्तु तत्र पिप्पलीप्रक्षेपः न करणीयः।**

**– पुष्करमूल-कर्टूफल-भार्गी-कर्कटशृङ्गी-मुस्त-चव्य-चित्रकैः शृतं पयः पीत्वा नरः श्वास-कासज्वरैः विनिर्मुक्तो भवति। पुष्करादीनां प्रत्येकं ग्रामैकपरिमितानां स्थूलं चूर्णं विधाय 200 मिलीलीटरपरिमिते पयसि तत्सममेव पानीयं सम्मिश्र्य दुग्धावशेषं क्वथनं विधाय सितोपलां ग्रामत्रयपरिमितां प्रक्षिप्य तद्दुग्धं पातव्यम्।**

**अनेन ऋतुवैकारिकभावैर्जनितानां रोगाणामपवारणं निवारणं च भवति। अत एव सुस्पष्टं यत् प्रतीकारमपेक्षन्ते ऋतुवैकारिकाः भावाः।**

## ऋतुविकार में सेवनीय कुछ योग–

यद्यपि ऋतुवैकारिक भाव फरवरी-मार्च महीनों में ही उत्पन्न होते हैं। किन्तु उन विकृतिकारक भावों का प्रभाव तो अप्रेलमास में भी निरन्तर दिखाई देता है। अतएव अप्रेल मास में भी निम्नलिखित योगों का प्रयोग किया जाना चाहिये। जैसे–

– चित्रकहरीतकी, अगस्त्यहरीतकी, च्यवनप्राश, वासावलेह, कण्टकार्यवलेह, इत्यादि का सेवन करना चाहिये।

– जीवक-ऋषभक-काकोली-भूमि आँवला-द्राक्षा-ऋद्धि-जीवक से उबाला गया दूध पीना चाहिये। इससे कास, श्वास, ज्वर और दाह में लाभ होता है।

– लाजा-नागर मोथा-कचूर-रास्त्रा-आँवला-बहेडा से निर्मित क्वाथ शर्करा, शहद और घी मिलाकर सेवन करने से यह कास-श्वास विनाशक होता है।

– अडूसा-नागरमोथा-पिप्पली-द्राक्षा-कण्टकारी-हरिद्रा-पुष्करमूल-भार्ङ्गी इत्यादि से निर्मित क्वाथ सेवन करना चाहिये।

– पिण्डखर्जूर-अडूसा-मुनक्का-मिश्री-लाजा को समान भाग में प्रत्येक को पांच ग्राम की मात्रा में ग्रहण करके विधिपूर्वक क्वाथ बानाना चाहिये। इसके पश्चात् स्वाङ्गशीत क्वाथ में दस ग्राम की मात्रा में शहद मिलाकर अर्ध ग्राम की मात्रा में पिप्पलीचूर्ण का प्रक्षेप डालकर यदि श्वास-कास-ज्वर से पीड़ित पीता है तो शीघ्र लाभ प्राप्त करता है। यदि अप्रेल महीने में तीव्र धूप हो तो भी खर्जूरादि से निर्मित क्वाथ का सेवन उपयुक्त है पर इस में पिप्पली का प्रक्षेप नहीं डालना चाहिये।

– पुष्करमूल-कायफल-भार्गी-काकडाशृङ्गी-नागर मोथा-चव्य-चित्रक से उबाला गया दूध पीकर व्यक्ति श्वास-कास-ज्वर से मुक्त हो जाता है। पुष्कर आदि प्रत्येक द्रव्य को एक ग्राम की मात्रा में लेकर मोटा चूर्ण बनाकर 200 मिलीलीटर की मात्रा में दूध में बराबर पानी मिलाकर दूध शेष रहने तक उबाल कर तीन ग्राम की मात्रा में मिश्री मिलाकर उस दूध को पीना चाहिये।

इनके सेवन से ऋतुवैकारिक भावों से उत्पन्न रोगों का अपवारण और निवारण होता है। इस से यह स्पष्ट है कि ऋतुवैकारिक भाव प्रतीकार की अपेक्षा करते हैं।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**
**भारत प्रकाशन (दिल्ली) लिमिटेड**
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,